RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

॥ ओ३म् ॥

दाने तपसि शौर्ये वा
विज्ञाने विनये नये।
विस्मयो न हि कर्तव्यो
बहुरत्ना वसुन्धरा

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत - संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

दूरस्थोऽपि न दूरस्थो यो
यस्य मनसि स्थितः।
यो यस्य हृदये नास्ति
समीपस्थोऽपि दूरतः॥

( चाणक्य-नीति )

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-७ 卐 अंकः-१५ ( १५७ ) 卐 १ फरवरीमासः २०१८ तः १५ फरवरीमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७४ 卐 सृष्टिसंवत्-१,९६,०८,५३,११५ 卐 पृष्ठम्-८

## युवकानां कृते राष्ट्रप्रेरणायाः श्रोतोऽस्ति गणतन्त्रदिवसस्य अवसरे आयोजित संस्कृतकवि सम्मेलनम्-पी.एन.शास्त्री

नवदेहली। गणतन्त्र दिवसस्यावसरे दिल्लीसंस्कृतआकादमी माध्ययेन आयोजित राष्ट्रिय कवि सम्मलेनस्य अध्यक्षता समये राष्ट्रिसंस्कृतसंस्थानस्य कुलपति प्रो. पी.एन.शास्त्री उक्तवान यत् विश्वस्य अनेक प्राचिन भाषाः एवं संस्कृति अद्यापि स्व गौरवं एवं महत्वेन सह विद्यमानोऽस्ति यद्यपि अस्याः मूले संस्कृतभाषाऽस्ति। विश्वे काव्यरचना सर्वप्रथमम् अस्यां



यत् अस्य प्रकारस्य कविसम्मेसनस्य आयोजनेन युवकान राष्ट्रं प्रति स्व दायित्वं प्रेरणा मिलिस्यति। तं देशस्य प्रतिष्ठित संस्कृत श्रवणं व अधिनमस्य अवसरः मिलिस्यति। अस्मिन्नवसरे अकादम्याः उपाध्यक्षा डॉ. कान्ताभाटिया उक्तवती भाषायामेव अभवत्। समारोहस्य मुख्यातिथि कमाण्डो सुरेन्द्रसिंह उक्तवान यत् भारतस्य सर्वाषां प्रान्तिभाषायां संस्कृत शब्दानां बाहुलतास्ति। गणतन्त्र दिवसः राष्ट्रात् प्रति कर्तव्यानाम्

**शेषभागःद्वितीयपुटे**

## संस्कृत विद्यालयेषु पारम्परिक शिक्षया सह आधुनिकविषयस्यापि अध्ययनं आवश्यकं भवेत्-योगीआदित्यनाथ

लखनऊ। उत्तरप्रदेशस्य मुख्यमंत्री योगीआदित्यनाथ उक्तवान यत् संस्कृतविद्यालयेषु पारम्परिक शिक्षया सह आधुनिकी विषयमपि पाठनीयम्। योगी उत्तरक्षेत्रस्य राज्यस्य अल्पसंख्यकल्याणमंत्री



व अधिकारीजनेन सह एकः समन्वय समारोहं सम्बोधयति स्म। ते उक्तवन्तः यत् अल्पसंख्यक मदरसा एवं संस्कृतविद्यालयस्य निरस्तिकरणं समस्यायाः समाधानं नास्ति। एषु विद्यालयेषु आंग्ल, सङ्गणक एवं विज्ञान विषयस्यापि अध्ययनं भवितव्यम्। योगी उक्तवान यत् अल्पसंख्यकजनानां पार्श्वे प्रतिभा तु अस्ति परञ्य तस्य पार्श्वे मंचः नास्ति। प्रधानमंत्री-कौशलविकास योजनायाः तहत क्रान्तिकारि परिवर्तनं भवितुं शक्यते। अस्य कार्यक्रमस्यान्तर्गत "6" लक्ष्य युवकान् पञ्जिकृत कृतवान। इदानीं पर्यन्तं 4.50 लक्ष्य युवकानां प्रशिक्षणं सम्पन्नो जातः। एषु 1.50 लक्ष्य युवकान् रोजगारमपि प्राप्तमभवत्। अस्मिन्वसरे केन्द्रियअल्पसंख्यक कार्यमंत्री मुख्तारअब्बासनकवी एवं उत्तरप्रदेशस्य संस्कृति एवं धर्मार्थकार्यमंत्री लक्ष्मीनारायणचौधरी अपि उपस्थिताः आसन्।

## उत्तराखण्डसंस्कृतअकादम्या अखिलभारतीय संस्कृतकवि सम्मेलनम्


देहरादून। उत्तराखण्डसंस्कृतअकादमी हरिद्वारस्य पक्षतः ट्रांजिटहोस्टल रेसकोर्स मध्ये अखिलभारतीयसंस्कृतकवि जनभाषा निर्मातुं प्रयासः प्रचलति। अस्मिन्नवसरे रायवरेलीतः समागतः हास्यकवि डॉ. वेणीमाधवशास्त्री, अलीगढ़तः डॉ.





सम्मेलनस्यायोजनमभवत्। सम्पूर्ण देशतः समागतः कवयः संस्कृतस्य रचनाभिः सर्वान् मंत्रमुग्धः कृतवन्तः। कवयः स्व रचनायां माध्यमेन गणतन्त्रस्य महिमा, भारतीय संस्कृति, देशस्य वर्तमान परिदृश्यादि अन्य विषयेषु स्व प्रस्तुति प्रदत्तवान। कार्यक्रमस्य शुभारम्यः गुरूकुलमहाविद्यालयस्य छात्राणां मंगलाचरणेनाभवत्। कविसम्मेलनस्योद्घाटने संस्कृतविभागस्य अपरसचिव विनोदरतुड़ी कृतवान। ते उक्तवन्तः यत् संस्कृत प्राचीनकालादेव वार्तालापस्य भाषा अस्ति। अद्यापि संस्कृतं द्वारिकानाथत्रिपाठी, दिल्लीतः डॉ. वलदेवानन्दसागर, हरियाणातः डॉ राजकुमारमिश्रः, पिथौरागढ़तः डॉ. हेमचन्द्रबेलवाल आदि कवयः स्व रचना माध्यमेन श्रोतान् मंत्रमुग्ध कृतवान। कार्यक्रमस्य संचालनं डॉ. सी.एस.आर.सिङ्गरेड्डी कृतवान। अस्मिन्नवसरे शोधाधिकारी नवीननैथानी, डॉ. हरिश्चन्द्रगुरुरानी, डॉ. सुर्यमोहनभट्टः, मनोजशर्मा, रामलखनगौशिला, कवितामैठाणी, ऋचाआर्या, भागीरथशर्मा इत्यादयः गणमान्यजनाः समुपस्थिताः आसन्।

## पुण्यतिथिः



( ३०.०४.१९३२ -- ०७.०२.२०१३ )

एतत्पत्रप्रबन्धसम्पादकस्य पितुः
स्व. पं. रामकिशोरशर्मणः
पुण्यतिथौ
संस्कृतसंवाद परिवारोऽयं
श्रद्धाञ्जलिं समर्पयति।
-संस्कृतसंवादसदस्याः।

# कुम्भस्य प्रतीकचिन्हे स्विस्तिकस्य स्थाने ॐ

लखनऊ। आगामि वर्षे इलाहाबादस्य संगमतटे आयोजित विश्वस्य सर्वाधिक वृहद समारोह कुम्भस्य प्रतीकचिन्हे राज्यसर्वकारः आंशिकपरिवर्तनं कृतवान। इदानीं एषु कलशे स्वास्तिक इत्यस्य स्थानं ॐ भविष्यति। विद्वद् जनानां परामर्शे सर्वकार एतादृशं परिवर्तनमकरोत्। प्रमुखसचिव (पर्यटन) अवनीशअवस्थी उक्तवान यत् चिन्हस्य घोषणानन्त अनेक परामर्शः आगच्छति। अधिकांशतः जनानां कथनमस्ति यत् स्वस्तिकस्य स्थाने ॐ अधिक उपयुक्तोऽस्ति। अयं कुम्भस्य भावनां सम्यक् तया प्रदर्शयति। उल्लेखनीयोऽस्ति यत् प्रदेशसर्वकारः 13 दिसम्बरतः प्रतीकचिन्हं घोषितवान। इयं कुम्भतः सम्बन्धित सर्वेषु प्रयोगअनिवार्यः कृतवान।

# संस्कृत पत्रकारितायाः त्रैमासिक प्रमाणपत्र पाठ्यक्रमस्यारम्भः

नवदेहली। भारतीय जनसंचार संस्थान एवं श्रीलालबहादुरशास्त्री संस्कृतविद्यापीठस्य संयुक्त तत्वावद्याने संस्कृतपत्रकारितायां त्रैमासिक प्रमाणपत्र पाठ्यक्रमस्य आरम्यो जातः।

ज्ञातोऽस्ति यत् संस्कृतभाषायां पत्रकाराणां न्युनतां दृष्ट्वा अस्य पाठ्यक्रमस्य आरम्भ अकरोत्। संस्कृतछात्र स्वाध्ययनेन सह अस्य प्रमाणपत्रस्य पाठ्यक्रमं कर्तुं शक्यते।

भारतीयजनसञ्चारस्य महानिदेशक के.जे.सुरेश अस्मिन्नवसरे उक्तवान यत् संस्कृतात्पूर्व मलयालम, मराठी एवं उर्दू भाषायापि पत्रकारितायाः प्रमाणपत्र पाठ्यक्रमस्य आरम्भ अकरोत्। संस्थानस्य प्रयासोऽस्ति यत् भारतस्य पत्रकारिता भारतीयभाषायामेव भवेत्। मुख्यातिथि प्रेससूचनाविभागस्य महानिदेशक अनिलकुमारसक्सेना उक्तवान् यत् संस्कृतं प्रोत्साहनस्य आवश्यकताऽस्ति। संस्कृतविद्यापीठस्य कुलपति प्रो. रमेशकुमारपाण्डेय संस्कृतपत्रकारिता एवं तस्य महत्वस्य विषये उक्तवान। भारतीयजनसंचारस्य जनसम्पर्क अधिकारि उक्तवान् यत् दूरदर्शनं संस्कृत पत्रकारितायै जनान् आमन्त्रितमकरोत परञ्च योग्य जनाः न प्राप्तम्। अतः संस्थान इदं संस्कृत पत्रकारितापाठ्यक्रमं आरम्भस्य प्रयत्नमकरोत्।

# भवतु संस्कृतगृहं लसतु परम वैभवम्- डॉ श्रेयांशः

वार्ताहरः रमेश आचार्यः जीन्द, हरियाणा अद्य माघशुक्लद्वितीया संवत् 2074 शुक्रवासरे (19/01/2018)संस्कृतभारती हरियाणा जनपदसंस्कृतसम्मेलनम् आयोजितवती। आयोजनमिदं चौधरी रणवीर सिंह विश्वविद्यालयस्य सौजन्येन सम्पन्नम्। अस्मिन् प्रसंगे दशदिवसीयं संस्कृतसम्भाषणशिविरम् सञ्चालितम्। तत्र शताधिकं



विद्यार्थिनःशिक्षकाःसामाजिकाश्च भागं गृहीतवन्तः। शिबिरस्य समापनसत्रे जनपदसंस्कृत सम्मेलनस्य आयोजनं कृतम्। सम्मेलन अध्यक्षः प्रो राजबीर सोलंकी कुलगुरुः चौधरी रणवीर सिंह विश्वविद्यालय जीन्द, मुख्यातिथिः श्री रमेश चन्द्र जी, सेवानिवृत्त प्राचार्यः,विशिष्टातिथिः आचार्य देवीदयालः, सारस्वतातिथिःश्री फूलकुमार शास्त्री, मुख्यवक्ता डॉ श्रेयांश द्विवेदी उपाध्यक्ष संस्कृत भारती हरियाणा । अस्मिन्नवसरे उपाध्यक्षेण स्वीयोद्बोधने प्रोक्तं यत् संस्कृतस्य महत्त्वं न प्रकटनीयम् अपितु संस्कृते सम्भाषणं संस्कृतेन चिन्तनं संस्कृतेन क्रीडनं परमावश्यकम्। तेनोक्तं यत् सर्वेषां रक्ते संस्कृतं मानसे संस्कृतं पूजा गृहे संस्कृतं विद्यते। साम्प्रदायिक आवश्यकमस्ति यत् संस्कृतम् मुखे आगच्छेत्, शयनकक्षे, अतिथिकक्षे पाकशालायाम् आगच्छेत्, तेन संस्कृतगृहनिर्माणं भविष्यति। संस्कृतगृहाणि भवन्तु इति संस्कृतभारती वाञ्छन्ती कार्यो कर्तुं समुद्यता। संस्कृतगृहेषु सुशिक्षिताः संस्कारशीलाः जनाः निर्मीयन्ते। ते सर्वे भारतं परं वैभवं प्रदातुं समर्थाः भविष्यन्ति। भवन्तः सर्वे राष्ट्रकार्याय संस्कृतभारत्यै समयदानाय संकल्पिताः भवन्तु। आगच्छन्तु वयं सर्वे कार्यकर्तारः समयदानं कर्तुं संकल्पं कुर्मः। कुलगुरु

सोलंकी महोदयेन संस्कृत भारती द्वारा संस्कृतशिबिर विधायाः भूरिशः प्रशंसा कृता। तेन सर्वतो भावेन संस्कृतमयः वातावरणं कर्तुम् संकल्पः स्वीकृतः। अस्मिन्नवसरे श्रीमान् सञ्जय कुमार सिन्हा, श्रीमान् दलवीर सिंहः,श्री सतीशः , श्रीमान् सुशील कुमारः,अभाविपरिषद्, डॉ सुरेन्द्र कुमारः, श्री राजवीरः, श्री रमेश आचार्यः, श्री सतीश कौशलः,श्री



राजेन्द्रप्रसाद शास्त्री, श्री रमेश चन्द्र, श्री भालचंद्र, श्री सत्यवान जी , श्री अमनदीपः विस्तारकः शिबिर , श्री रोहितः शिबिरसहशिक्षकः अन्ये च विश्वविद्यालयस्य आचार्याः गणमान्याः नगरवासिनः संस्कृतानुरागिणः समुपस्थिताः आसन्।

**प्रथमपुटस्य शेषभागः**

## युवकानां कृते राष्ट्रप्रेरणायाः श्रोतोऽस्ति...

अवलोकनस्य पर्वोस्ति। अस्मिन्नवसरे डॉ. अन्नुरानी, डॉ. रामसुमेरयादव, डॉ. दलवीरसिंह, डॉ. राजेश्वरप्रसादसिंह, डॉ.वाजीशदिवकर, डॉ.बलदेवानन्दसागर, प्रो. कमलेश झा, डॉ. गोकुलेन्द्रनारायणदेव, डॉ. सुरचनात्रिवेदी, प्रो. रमेशकुमार पाण्डेय, प्रो. जगदीशप्रसादसेमवाल, प्रो. ललितकुमारगौड, श्रीमतीआभाझा, डॉ. बलरामशुक्ल, प्रो. भागीरथीनन्द, डॉ. परमानन्दझा, आदि कवयः काव्यपाठं कृतवन्तः।




# श्रीमद्भगवद्गीता भारतं विश्वगुरुः पदे नेतुं समर्थः-डॉ श्रेयांश द्विवेदी

मेवात। माघशुक्लप्रतिपदा संवत् 2074 बुधवासरे राजकीय कन्या वरिष्ठ माध्यमिक विद्यालय तावडू मेवात मध्ये हरियाणा संस्कृत अकादमी पञ्चकूला 'नगरे भगवद्गीता जने जने संस्कारः' इति कार्यक्रमम् प्रायोजितवती। आयोजनं श्री तेजपाल सिंह चौहान



प्राचार्यः कृतवान्। अस्मिन्नवसरे मुख्यातिथिः अकादम्याः उपाध्यक्षः डॉ श्रेयांश द्विवेदी आसीत्। तेन श्रीमद्भगवद्गीतायाः उपयोगिता प्रक्रिया। तेनोक्तं यद् भारतं विश्वगुरुः तदा स्वयमेव भविष्यति यदा भारतस्य प्रत्येकं जनः गीतायाः पारायणं कर्तुं समर्थः भविष्यति। तेनोक्तं यद्गीतायां मानवीयमूल्यानां समग्रं चिन्तनं वर्तते । अस्मिन्नवसरे छात्राः श्लोकान् कण्ठस्थीकृत्य श्रावितवत्यः। अस्मिन्नवसरे श्रीमती सरोज यादव, श्री तेजपालः, श्री जितेन्द्रः श्री राजपालः, श्री जितेन्द्र कुमार, श्री सुनीलः प्रभृतयः नैके गणमान्याः समुपस्थिताः आसन्।

# श्रीमद्भगवद्गीता भारतं विश्वगुरुः पदे नेतुं समर्थः

डॉ श्रेयांश द्विवेदी

माघशुक्लप्रतिपदा संवत् 2074 बुधवासरे राजकीय कन्या वरिष्ठ माध्यमिक विद्यालय तावडू मेवात मध्ये हरियाणा संस्कृत अकादमी पञ्चकूला 'नगरे भगवद्गीता जने जने संस्कारः' इति कार्यक्रमम् प्रायोजितवती। आयोजनं श्री तेजपाल सिंह चौहान प्राचार्यः कृतवान्। अस्मिन्नवसरे मुख्यातिथिः अकादम्याः उपाध्यक्षः डॉ श्रेयांश द्विवेदी आसीत्। तेन श्रीमद्भगवद्गीतायाः उपयोगिता प्रक्रिया। तेनोक्तं यद् भारतं विश्वगुरुः तदा स्वयमेव भविष्यति यदा भारतस्य प्रत्येकं जनः गीतायाः पारायणं कर्तुं समर्थः भविष्यति। तेनोक्तं यद्गीतायां मानवीयमूल्यानां समग्रं चिन्तनं वर्तते । अस्मिन्नवसरे छात्राः श्लोकान् कण्ठस्थीकृत्य श्रावितवत्यः। अस्मिन्नवसरे श्रीमती सरोज यादव, श्री तेजपालः, श्री जितेन्द्रः श्री राजपालः, श्री जितेन्द्र कुमार, श्री सुनीलः प्रभृतयः नैके गणमान्याः समुपस्थिताः आसन्।

# ‘‘अभिराजराजेन्द्रमिश्रकवेः गजलानां संवैधानिकं वैशिष्ट्यम्’’

–अनीता सिंह
शोधनिर्देशकः–प्रो0 हरीश्चन्द्र तिवाडी
उत्तराखण्ड–संस्कृत–विश्वविद्यालयःहरिद्वारम्।
email-anitasinghsds 857@gmail.com

पृष्ठभूमिः–

अर्वाचीन संस्कृतसाहित्य सर्जनायाःक्षेत्रे रससिद्धकविः अन्ताराष्ट्रियख्याति प्राप्त विद्वान् वरिष्ठसाहित्यकारःप्रो0 अभिराजराजेन्द्रमिश्रः महनीय–वैलक्षण्य युक्त प्रतिभया ओत–प्रोतष्च कविः विराजते,यस्यापरं–नाम त्रिवेणीकविराजःवर्तते।अस्य कवेः सारस्वत साधना तस्यवैषिष्ट्यस्यान्तिमस्य–भागस्य स्पर्षं करोति,यत् ‘सारस्वतकोष’ इति नाम्नाऽभिहितमस्ति।

कवेरस्य जीवनेस्मिन् नैकाः वदन्तयः श्रूयन्ते ? यत् प्रो0 मिश्रकवेः समर्पित–श्रद्धया प्रसन्नं भूत्वा ‘वाण्याःदेवी सरस्वती’ कवेः समीपं पुत्रवात्सल्य–भावनया धावन्ती मातुःप्रेम्णःप्रतिमानमप्रकटयन्ती, स्व वरदहस्तैः आषीर्वचोभिष्च कवये–अस्मै पूर्णतामयच्छत्,अन्यथा एकत्रैव–अनेकेषां सद्गुणानां–वैषिष्ट्यानां्च समावेषः कथं भवितुं षक्यते ?

कवेः प्रसंषायां डाँ0सुषीलकुमारःपाण्डेयोऽपि कथयति–

भगति हेतु विधिभवन विहाई।
सुमिरत सारद– धावत आई।। 1

प्रो0मिश्रकविः स्व मधुरवाण्यां माँ ष्षारदाम्प्रतिकृतज्ञतामभिव्यनक्ति,कथयति च–

स्रवति कविता मदीया वाक्प्रचारे।
रणन्नूपुरनिभा तत्पादलग्ना।। 2

अयं त्रिवेणीसंगमः कविराजः स्व कण्ठमाधुर्येण सम्पूर्ण संसारस्य कृते बरबस नूतनसृष्टेः रचनां कृत्वा श्रोतृजनानां हृदयेष्वानन्दं पूरयति,एवं नवरसानां संचारं प्रसारयति।

अन्यदपि–संसारेऽस्मिन् कवेःगीतकथा–निबन्धाष्चाकाषेखगी रूपेण सर्वत्रोड्यन्ते यथा– नाऽस्यऽभिराजगीत कथा–निबन्धाः।

क्वनो सम्प्रति खगीभूयोड्यन्ते ?।। 3
येऽभिराजस्य काव्ये निमग्नाः सदा।
मन्यते ते क्व वा निग्रहांऽनुग्रहाः।। 4

अयं प्रो0 मिश्रः वसुधैवकुटुम्कं इत्यनया–भावनया ओत–प्रोतष्च भूत्वा व्यथित मनसा स्वमनोवेदनाम्प्रस्तुवन् कथयति–

ध्रुवं निष्फलत्वं मत्कवित्वं नु जातम्।
ममैवानुजा नेच्छवो मामुपैतुम्।।5

अर्थात् –अस्माकं भाविनैव यदि काव्य–परम्परायाः अनुसरणं कर्तुं न वाञ्छन्ति तर्हि कवित्वमथवाकविता निष्फलत्वं जायते,परञ्च अस्योपरिरपि कवेः स्वाभिमानस्य विजय–पताका प्रसरति,इत्थं कविः प्रकटयति–

अङ्गगीतिस्त्रिवेणी कवे श्रूयतां।
प्राकृतेयं नभोः पूतमन्त्रात्मिका।।6

अर्थात्–पूतमन्त्रात्मिकानां–गजलानां सुदीर्घ– परम्परया प्रो0 मिश्रः समकालीनसंस्कृतसाहित्यं समृद्धिमयच्छत्।

अन्यदपि–यस्य कवेः जीवनस्याविर्भावः महाकविभवभूतेः–पण्डितजगन्नाथस्य च कुले समुत्पत्तिर्बभूव स एव मिश्रकविः तेषां–कविनां परम्परायाः उत्तरोत्तर नवनवोन्मेषषालिन्याः–प्रतिभायाः आकांक्षी वर्तते।

‘कुलेभवभूतिपण्डितराजयोर्जातोऽभिराजोऽहम्’

यत्र–एकस्मिन्नस्थले प्रो0मिश्रकवेः काव्यरूपीसंसारः नवनवोन्मेषपूर्वकं नूतनविधानां माध्यमेन वर्तमान संस्कृतभाषायाः मृतभाषारूपं–मिथ्यापवादं निवारयति,तत्रैवाऽन्यस्मिन्नस्थले गजलानां–षड्संग्रहाणांञ्च प्रकाषनं करोति,यथा–मत्तवारणी–षालभन्जिका–हविर्धानी–कनीनिका–षिखरिणी–औदुम्बरीणाञ्च सर्जनया विस्तारं प्रयच्छति,तथा च वर्तमानकालस्य विकटत्वं–भिषणत्वञ्च संस्कृतकवितायाः माधुर्यं केन–प्रकारेण छेदनं–भेदनञ्च करोति,तदपि वर्णयति,कविराजोऽत्र–

यस्य हस्तौ तूलिका विद्यते,षोभनंवर्णं–पर्णं्चापि षोभते स एव चारू–चित्रस्य निर्माणे समर्थं भवितुं ष्षक्यते। यथा–तीर्णो मया काव्याम्बुधिर्न बिभेमि।

अयं कविराजः,कबीरस्य स्वरे–स्वरालापयन् कुर्वन् कथयति,यत् कबीरः झीनी–झीनी छादनिका (चादर) एवमेव स्थापितं,परन्तु मामेतत् विरोधाभाषःप्रतीयते,यतः संस्कृत सर्जनारूपी छादनिकां स कविराजः नूतनायामैः समृद्धिमयच्छत्।अतःकविरत्र प्रतिज्ञामभिव्यनक्ति–

लेखन्या जातोऽजरोऽमरो।
निर्घुष्टो भारतरत्नोऽहम्।।

अन्यदपि–स्वस्मिन्नेव विष्वासः कवेः सफलत्वमनुसंधत्ते –

तुलय नान्यं न चाप्यात्मानमपि तोलय परैस्सार्धम्।
भवात्मन्येव विष्वस्तो भविष्यसि जातु नो जीर्णः।।

रदीफ–काफिये इत्यनयोःअद्भुतं–सयोजनं लय–पितृवनायते,ऊषरायते,कण्टकायतेत्यादिनां– क्रियापदानां च प्रयोगहेतुत्वात् गजलानां सौन्दर्यषोभा मनोहरत्वं लभते।

‘गजल साहित्यस्येतिहासः’

गजलविधायाःसंवैधानिकं (format) अरबी–उर्दूष्चाप्यायोज्यते,एवं संस्कृतसाहित्यस्याधुनिक काव्य–परम्परां विषय–वस्त्वानुसारेण अस्याः–विधायाःनूतनायामं प्रयच्छति।

अर्वाचीन संस्कृतसाहित्ये गजलप्रवर्तकरूपेण सर्वप्रथमःकविः महामहोपाध्यायभट्टमथुरानाथषास्त्रीः सर्वाग्रणीःकविः विराजते। ततःपरम् आचार्यबच्चूलाल अवस्थीः–आचार्यःपण्डितराजजगन्नाथपाठकः–प्रो0मिश्रोऽभिराजराजेन्द्रः–आचार्यःराधावल्लभत्रिपाठिनाञ्च काव्य–परम्परा संस्कृत गजलस्य कृते इत्थंविध सुनियोजितंमार्गं दरिदृष्यते, यत् गजलविधायां कस्यारपि–भाषायाः एकाधिकारः नास्ति,अपितु सार्वजनिकमणिकाञ्चन षिल्पः वर्तते,यत् सर्वजनहिताय भावनात्मक संवेदनानामर्थ–गौरवं प्रकटयति।

यतः अर्वाचीन संस्कृतकवयः गजलविषय–वस्तुष्वेकमद्भुतमेवं क्रान्तिकारि–परिवर्तनं कृतवन्तः।

यतः् एतेषां गजलेषु प्रेम–गीतयः सन्दृष्यन्ते,अन्यदपि जीवनस्य यथार्थ्यमप्यवलोक्यते।अत्रैव संस्कृतगजलगीतीनां वैषिष्ट्यमपि दरिदृष्यते। सैव कविता अभावेऽपि–भावमुत्पादयति,अनेकतायामेकताम् –वेदनायां–संवेदनाम्,वैषम्यतायां– सामञ्जस्यम्,निरसतायां–सरसताम्,निर्झरतायामपि–वसन्तोत्सवष्चाप्यवलोक्यते। अतः

कविः पदबन्धतूलिकया यदाऽऽलिखति स्वकं हृदयं।
तदेवोक्तं गलज्जलकम्–7

अयं प्रो0मिश्रः काव्यसर्जनायाः क्षेत्रे काव्यपरम्परां पुनर्नवां कृत्वा नूतनार्थविच्छितीनां प्रवाहं प्रस्तौति,एवं दामिनीदलितायाः कृते स्वकृत गजलेषु सहृदयजनानां हृदयेषु संवेदनां प्रकटयति–

महद्दुःखान्तनाट्यमहोनुजातंहायनं चैतत्।
हृताभूयोऽपि वैदेही द्रुपजा कौरवष्छलिता।। 8

स्वजीवनेऽस्मिन्नयं कविराजः मार्मिक–संवेदनाभिःप्रस्फुटितानांसंस्कृतगजलानां विस्तृतं–संविधानं प्रस्तौति,एवं विषयवस्तुनि एकमद्भुतं क्रान्तिकारि,दार्षनिकं–सामाजिकम्–वैष्विकमनुचिन्तनञ्च संयच्छति,एवं वर्तमानकालिकदषायामुपरि खिन्नत्वमनुभवति–वर्णयति च–

दीपकाधस्तलं तैमिरंश्रूयते ।
तच्चदृष्टान्तभूतं न किं भारतम्।।9

सुकविराजेन्द्रकवेः पदष्या अस्मान्–जनान्नानन्दयति ,एवं रदीफ–काफियेत्यनयोःअद्भुतं–संयोजनं,लय–सौन्दर्ययोष्च समन्वयं कवेः गजलेषु मनोहरतायाः संचारं प्रसारयति।

प्राचीन्नाचर्यैः यदुक्तमस्ति, गीतितत्वानामेव सामसंज्ञाऽभिहितमस्ति,अस्माद्धेतोः गीतितत्वानां महत्वं षिरसाऽवधार्यते। यथा–यच्चगीतिषु सामाख्येत्युक्तमासीत्पुरातनैः।

तेनैवगीतितत्वस्य महत्वं धुरि संस्थितम्।10

ये कवयः–ऋषिमहर्षयष्च स्व,लयमूर्च्छनैः देवान्नपि वषीकर्तुं षक्नुन्ति,तदेकं नृत्यवाद्यसमन्वितं गीतितत्वमेव भवति,उक्तं्च–

देवानामपि समर्थं यत्प्रीणितुं लयमूर्च्छनैः।
गीतमेव तदेकं यन्नृत्यवाद्यसमन्वितम्।। 11
अलङ्काररसौचित्यध्वनिवक्रोक्तिरीतिभिः।
तस्मादलं यतो गीतं काव्यस्यात्मेति निष्चितम्।। 12

गीतिषु समाख्येति राजषेखरः।सामयति तोषयति देवानीति साम साम्नां वेदस्सामवेदः। साम्नि यद्देवतोषकरं तत्वं तद्गीतमेव। किं्च गीतं न केवलं देवानांमानवानामेव तोषकरमपितु पषुपक्षिमृगादीनामपि चेतोहरं तत्वम्। आहितुण्डिकस्तु मधुकरीवाद्यलयैः फणिनंभृषं नर्तयन् स्ववषी करोति। वन्यगजाः वीणा नादसम्मोहिता निगृह्यन्ते।किरातगीतवाद्यवषीकृत चेतना मृगा विततां वागुरामपि न पष्यन्ति।

नृत्यवाद्यसमन्वितं तदेवगीतंसंगीतंतोर्यत्रिकं वाप्युच्यते।नृत्यंगीतं्चवाद्यं्चत्रिभिस्सङ्गीतमुच्यते। यथा वा तौर्यत्रिकं नृत्यगीतवाद्यंनाट्यमिति त्रयमित्यमरः। गीतंगानमिमे समे इत्यमरः। तद्वदेवगीतिर्गेयंवाऽपिगीत साम्यं बिभ्र्ति। कविकुलगुरुकलिदासविरचितेऽभिज्ञानषाकुन्तलनाम्नि नाटके पञ्चमाङ्के हंसपदिकायाः गीतमाकर्ण्य दुष्यन्तःसप्रषंसं कथयति–अहोरागपरिवाहिणी गीतिरिति। तेन रागपरिवाहित्वमेव गीतिवैषिष्ट्यं प्रतिभाति। 13

तत्रैव नाटकारम्भे सूत्रधारो नटीं ब्रूते–

तवास्मिगीतरागेण हारिणा प्रसभं हृतः।
एष राजेवदुष्यन्तः सारङ्गेणातिरंहसा।।14

अत्रापि गीतरागस्य वैषिष्ट्यं प्रसह्य चित्तहारित्वमे प्रोक्तं। तस्माद् गीतम्महीयते स्वेन चतोहरेण गीतरागेणैवेति स्पष्टम्।

‘गजलसंविधानक निरूपणम्’

अनया–भावनया ओत–प्रोतष्च प्रो0मिश्रोऽभिराजराजेन्द्रः गजलगीतिनां संवैधानिकं वैषिष्ट्यं प्रस्तौति– कथयति च नानाप्रकाराणां‘बन्धविस्तारः‘ गीतेऽस्मिन् दरिदृष्यते,यत्‘बंधस्य‘ दीर्घतां प्रदर्षयन्निदं फारसी भाषायां ‘बहरिति‘ नाम्नाऽभिहितमस्ति।श्रेष्ठगजलकारस्य प्रयोग क्षमतां प्रकटयन् ‘बहरमिदं‘ गजलगीतेऽस्मिन् क्वचिल्लघीयान्,क्वचिद्राघीयान्नवलोक्यते। यादृषी‘संस्कृत कवितायां‘ गजलानामक्षर–विस्तारे स्थितिः सन्दृष्यते,तादृषैव‘फारसी‘ गजलस्य ‘बहरेऽपि‘ रमणीयामेका गणव्यवस्था दरिदृष्यते।

क्वचिद्धिः ‘बहरमिदं‘ मुत्कारबे, मुसम्मन, सालिमेति नाम्ना सम्बोध्यते,क्वचित्तु बहरेकामिलमुसम्मनेत्यभिधीयते। एतेषु –बहरेषु मफऊल–फऊलून–फाइलुन्नीत्यादिनां संज्ञोक्त प्रसिद्धगणानां व्यवस्थाः वर्तन्ते।

गजलस्य कस्मिन् ‘बहरे‘ को वा गणक्रमः प्रयोक्ष्यते ? तत् सर्वं फारसी–भाषायां छन्दषास्त्रे सुनियोजितमस्ति।

बन्धविस्तारस्यार्थः गणानां विस्तारः संस्कृतछन्दषास्त्रे, वार्णिक छन्दसां विस्तारः एकेनाक्षरेण प्रारभ्य षड्विंषत्यक्षराणि पर्यन्तमवलोक्यते,इत्याह नाट्यषास्त्रकारः–

एकाक्षरं भवेदुक्तमत्युक्तं द्वयाक्षरं भवेत्।
मध्यत्रयक्षरमित्याहुः प्रतिष्ठा चतुराक्षरा।।15
सुप्रतिष्ठा भवेत्पञ्च गायत्री षड्भवेदिह।
सप्ताक्षरा भवेदुष्णिगष्टौ चानुष्टुवुच्यते।। 16
नवाक्षरा तु बृहती पङ्क्तिष्चैव दषाक्षरा।
एकादषाक्षरात्रिष्टुप् जगती द्वादषाक्षरा।। 17
त्रयोदषातिजगतीषक्वरी च चतुर्दष।
अतिषक्वरी पञ्चदष षोडषष्टिः प्रकीर्तिता।।18
अत्यष्टिः स्यात्सप्तदष धृतिरष्टादषाक्षरा।
एकोनविंषतिधृतिः कृतिर्विंषतिरेव च।।19
प्रकृतिष्चैकविंषत्या द्वाविंषत्याकृतिस्तथा।
विकृतिष्चत्रयोविंषा चतुर्विंषाच संस्कृतिः।। 20
पञ्चविंषत्यतिकृतिःषड्विंत्युत्कृतिर्भवत्।
अतोधिकाक्षरं यत्तुमालावृत्तं तदिष्यते।। 21

एवं हि एकाक्षरादुक्तादारभ्य षड्विंषत्यक्षरात्मिका मुत्कृतिंयावत्प्रस्तारः संस्कृच्छन्दसाम् वर्तते। अस्मिन्नेव ‘बहरपर्यायेप्रस्तारेऽगणितानि वृत्तानि‘ जायन्ते। तद्विषये कथयति–

नाट्यषास्त्रकारः–

छन्दसां तु भवेदेषां भेदोऽनेकःविधः पृथक्।
असंख्य पारिमाणानि वृत्तान्याहुरथोबुधाः।। 22
गजलस्य त्रयोभागास्तद्विद्धिः परिभाषिताः।
मतला–षेर–मक्ताख्यास्तदिदानीं प्रतन्यते।।23
गजलारम्भि यद्वाक्यं मूलभावप्रकाषकम्।
तदेव फारसीवाचि मतलेति समुच्यते।। 24
अन्तिमष्चापि यो बन्धः कविनामङ्कितः खलु।
सोऽपि गजलतत्वज्ञैर्मकतेति निगद्यते।। 25
मतलामक्तयोर्मध्ये मूलभावैकपोषिणः।
बन्धा भिन्नाषया वापि कथिताःषेरसंज्ञकाः।।26
फारसी संविधानेन सर्वेणैतेन चाप्यलम्।
गजलेन च कस्तोषो देववाणी विपष्चिताम्।।27

प्रो0मिश्रकवेः गजलानां संवैधानिकं वैषिष्ट्यम्–

शेषभागः षट्पुटे

# सम्पादकीयम्

भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायामुक्तं कर्मण्येवाधिकारस्ते मा फलेषु कदाचन अयं हि निष्कामकर्मोपदेशः मानवानां जीवनं सम्यक् चालयितुं शक्नोति, हन्त! न मानवो विना फलं किमपि कार्यं कर्तुं प्रयतते। किन्तु आसन् मुनयो यैर्निष्कामभावनया विश्वोपकारार्थं सुरभारतीप्रचारमकुर्वन्। तेषामेव सत्पुण्येनास्माकं वेदा उपनिषदः दर्शनानि पुराणानि साहित्यं व्याकरणमित्येतत् सर्वमपि सुरक्षितं वर्तते। तेषु भारतवर्षस्य उत्तरप्रदेशस्य देवरियाजनपदे गृहीतजन्मानः काश्यां सार्वभौमसंस्कृत प्रचारसंस्थानस्य संस्थापकाः आचार्यवासुदेव द्विवेदिशास्त्रिणः आजीवनं सस्कृतस्य प्रचारं प्रसारं कृतवन्तः। तेषां बहवः शिष्याः अधुना समग्रेऽपि देशे देशान्तरे च संस्कृतं प्रचारयन्ति। वसन्तर्तौ शुक्लैकादशमी तिथिः रंगभरी एकादशी मन्यते एतेषां जन्मतिथिः। अस्यां गुरुवरजन्मजयन्ती समायोज्यते काश्याम्। भारतीयैकतासाधकं संस्कृतं भारतीयत्वसम्पादकं संस्कृतमिति यः स्वरः विश्वस्मिन् श्रूयते स आचार्यवराणामेव मुखारविन्दान्निर्गतो वर्तते। एतेषाम् अभिवादनपदम् अमरवाणी विजयतामिति सर्वोऽपि संस्कृतज्ञो जानाति।

अस्य विदुषः संस्कृतप्रचारार्थं कृता रचनाः नूनमेव प्रशंसनीयास्सन्ति। महान् कर्मयोगी द्विवेदिवरो मृत्वापि स्वयशसा जीवतीवेति न संशयः। संस्कृतसंवादः आचार्यवरवासुदेवद्विवेदिमहोदयानामष्टाधिकशततमजयन्त्यन्त्यां सादरं शुभकामान् प्रयच्छति कामयते च भारतभूमिरियं द्विवेदिवरं पुनः पुनः सुरभारतीप्रचारी विद्वान् जनयेदिति।

## वेदामृतम्

**(ऋग्वेदभाष्यम्)**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

अगले मन्त्र में इन्द्र शब्द से परमेश्वर का प्रकश किया है–

**मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे।**
**सचैषु सवनेष्वा ॥ 3॥**

अर्थ–जिसने संसार के प्रकाश करनेवाले सूर्य को उत्पन्न किया है, उसकी स्तुति करने में जो श्रेष्ठ पुरुष एकाग्रचित्त है, अथवा सबको देखनेवाले परमेश्वर को जानकर सब प्रकार से धार्मिक और पुरुषार्थी होकर सब ऐश्वर्य को उत्पन्न और उसकी रक्षा करने में मिलकर रहते हैं, वे ही सब सुखों को प्राप्त होने के योग्य वा औरों को भी उत्तम-उत्तम सुखों के देनेवाले हो सकते हैं ।।3।।

**असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत।**
**अजोषा वृषभं पतिम्॥ 4॥**

अर्थ–जिस ईश्वर ने प्रकाश किये हुए वेदों से जाने अपने-अपने स्वभाव, गुण और कर्म प्रकट किये हैं, वैसे ही वे सब लोगों को जानने योग्य हैं, क्योंकि ईश्वर के सत्य स्वभाव के साथ अनन्तगुण और कर्म हैं, उनको हम अल्पज्ञ लोग अपने सामर्थ्य से जानने को समर्थ नहीं हो सकते। तथा जैसे हम लोग अपने-अपने स्वभाव, गुण और कर्मों को जानते हैं, वैसे औरों को उनका यथावत् जानना कठिन होता है, इसी प्रकार सब विद्वान् मनुष्यों को वेदवाणी के बिना ईश्वर आदि पदार्थों को यथावत् जानना कठिन होता है। इसलिए प्रयत्न से वेदों को जानके उनके द्वारा सब पदार्थों से उपकार लेना तथा उसी ईश्वर को अपना इष्टदेव और पालन करनेहारा मानना चाहिए ।4।।

ईश्वर की उपासना से क्या लाभ होता हैं, सो अगले मन्त्र में प्रकाश किया हैसं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम्। असदित्ते विभु प्रभु ॥5॥

अर्थ–मनुष्यों के ईश्वर के अनुग्रह और अपने पुरुषार्थ से आत्मा और शरीर के सुख के लिए विद्या और ऐश्वर्य की प्राप्ति वा उनकी रक्षा और उन्नति तथा सत्य मार्ग वा उत्तम दानादि धर्म अच्छी प्रकार से सदैव सेवन करना चाहिए जिससे दारिद्र्य और आलस्य से उत्पन्न होनेवाले दुःखों का नाश होकर अच्छे-अच्छे भोग करने योग्य पदार्थों की वृद्धि होती रहे ॥5॥

यह सत्रहवाँ वर्ग समाप्त हुआ। अन्तर्यामी ईश्वर हम लोगों को कैसे-कैसे कामों में प्रेरणा करे,

इस विषय का अगले मन्त्र में प्रकाश किया है-- अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः। तुविद्युम्न यशस्वतः ॥6॥

अर्थ–सब मनुष्यों को उचित है कि इस सृष्टि में परमेश्वर की आज्ञा के अनुकूल वर्तमान तथा पुरुषार्थी और यशस्वी होकर विद्या तथा राज्यलक्ष्मी की प्राप्ति के लिए सदैव उपाय करें। इसी से उक्त गुणवाले पुरुषों को ही लक्ष्मी से सब प्रकार का सुख मिलता है, क्योंकि ईश्वर ने पुरुषार्थी सज्जनों के लिए ही सब सुख रचे हैं।।6॥

# ।। तिस्रः जनन्यः त्रयः सुताः ।।

प्रो. कमलेशकुमार छ. चोकसी
संस्कृतविभाग, भाषासाहित्यभवन,
गुजरात युनिवर्सिटी, नवरंगपुरा,
अहमदाबाद – 380009 (गुजरात)

एतस्मिन् ग्रामे सीमान्तप्रदेशे एकः कूपः आसीत्। ग्रामवासिनः जनाः स्वीयेषु पात्रेषु इत एव जलमाहृत्य, तत् जलं स्वं गृहमानीय तेन जलेन जीवनं जीवन्ति स्म। एतस्मात् कारणात् अस्मिन् कूपे आदिनं जनसम्मर्दः दृश्यते स्म।

अथैकदा काश्चित्तिस्रः स्त्रियः कूपात् जलमानेतुं स्व स्व गृहतः सहैव कूपं प्रति प्रस्थिताः। मध्येमार्गं संलपन्त्यः ताः कूपं सम्प्राप्ताः। ततः परस्परसहयोगेन कूपतलात् जलं निःसार्य विविधेषु पात्रेषु जलं प्रक्षिप्य तिसृभिः स्त्रीभिः स्वकीयाणि पात्राणि जलेन पूर्णतां नीतानि।

यावत् ताः जलपूर्णानि पात्राणि आदाय ततः प्रस्थितुमिच्छन्ति तावदेव कश्चित् एकः प्रायः दशवर्षीयः बालः ततः निःसृतः। बालः असौ मन्दं मन्दं चलति, स्त्रीः प्रति दृष्टिप्रक्षेपं कृत्वा मन्दं मन्दं स्मितं कुर्वन् वायुरिव ततः निर्गतः।

कूपस्था एका स्त्री निःसरन्तं तं बालं दृष्ट्वा, अन्ये दर्शयन्ती सगर्वम् उक्तवती – भगिन्यौ! अयं मे पुत्रः। अधुना असौ महानगरस्थिते अन्तर्राष्ट्रिये अत्यन्ते आधुनिके विद्यालये पठति। तत्र आङ्गलभाषामाध्यमं प्रचलति। आदिनमसौ आङ्गलभाषामेव भाषते। – इत्यादि बहु प्रलपन्ती सा स्वात्मानं स्व पुत्रं च गर्वेण भरन्नपि तुष्टिं नानुभवति स्म।

परन्तु वस्तुतः पार्श्वतः गच्छन्नपि तस्याः प्रथमायाः स्त्रियः असौ पुत्रः केवलं ताभ्यः स्मितं प्रदाय एव ततः शीघ्रं प्रस्थितः, इति दोषं नानुभवति सा।

किञ्चित् कालानन्तरम् एकः कश्चित् तादृश इव दशवर्षीयः अपरः बालः ततो निर्गतः। तं दृष्ट्वा द्वितीया स्त्री अभिमानभरितेन वचसा प्रोक्तवती ङ्क अयं मे मध्यमः पुत्रः। अधुना असौ सीबीएससी-पाठ्यक्रमान्विते दिल्लीमहानगरे पठति। अवकाशत्वात् असौ अत्र ग्रामं प्राप्तवान् अस्ति। ग्रामस्थेन धूलेन आतपेन च प्रभावितः सन् असौ स्वास्थ्यहानिं न कुर्यादिति विचार्य सः सच्छत्रः समुखपट्टीकः गृहात् बहिः गच्छति, सत्वरं च पुनः गृहं प्राप्नोति।

एषः बालः अपि ताः पश्यन् कथञ्चित् प्रतिभावं प्रदाय क्षणमपि अतिष्ठन् अविरम्यैव ततः अग्रे प्रस्थितः। अस्य जननी गच्छन्तम् तम् दर्शं दर्शं महतीं प्रसन्नताम् अनुभूतवती, तां च अनुभूतिं सखिभ्यां वितरति स्म। पुनः पुनः कथयन्ती असौ परितोषं प्राप्नोति।

ततः कियत्कालानन्तरमेव एकः अपरः तृतीयः बालः तत्र समागतः। सः स्व जननीं कूपे दृष्ट्वा पुलकितमना तस्याः पार्श्वे समुपस्थितः। स्वकीयां जननीं नमः उक्त्वा यावत् विरमति तावदेव जनन्या प्रेरितः सः समीपोपस्थिते ते जनन्यौ प्रणमति। प्रणामं कृत्वा इमं घटं मह्यं देहीति सविनयं स्वमात्रे निवेदयन् जननी-हस्तात् जलभरितं घटं स्वहस्तमाधाय ताभिः सह गृहं प्रति प्रस्थितः।

सुतेन गृहीतत्वात् इयम् अपरा स्त्री रिक्तहस्ता जाता। सा निर्भारा सती सुखेन ततः प्रस्थिता। तया सहैव अन्ये अपि द्वे जनन्यौ प्रस्थिते। गतेषु दशेषु प्रक्रमणेषु मध्येमार्गम् सा सविनयम् उक्तवती ङ्क भगिन्यौ मम अयं पुत्रः गुरुकुले पठति। तत्र पठनं पाठनं च निःशुल्कं भवति। आदिनं स्वकीयं सर्वविधं कर्म छात्रः स्वयमेव करोति। गुरुजनाः पुत्रवत् छात्रान् पाठयन्ति पोषयन्ति च। तत्र सर्वे पितुः पुत्राः भवन्ति, न तु धनिकपुत्रः, राजपुत्रः, कृषकपुत्रः, उद्योगपतिपुत्रः, नेतृपुत्रः, राजशासनाधिकारिपुत्रः, पुरोहितपुत्रः, सेवकपुत्रः वा भवति। यथा सर्वे विना भेदभावं सूर्यमुपासते तथैवात्र विना भेदभावं सर्वे विद्यामुपासते। कूपतः पत्रानुसारि जलम् नीत्वा जनाः प्रतिनिवर्तन्ते, तथैव इतः गुरुकुलात् अपि छात्राः स्वकीयसामर्थ्यानुसारं विद्यां ज्ञानं च समर्जयित्वा स्वगृहं प्रतिनिवर्तते। गुरुकुले कृतेन कार्येण दैनिकं सर्वविधं कर्म ते स्वयमेव कर्तुम् प्रभवन्ति। समानमतिभिः कार्याणि साधयन्तः ते हृदयेनापि समानतया सुख-दुःखानि अनुभवन्ति। अतः गुरुकुलीयनाम् छात्राणाम् कृते व्यवहारकाले स्वपरभेदभावः कुत्रापि न दृश्यते। किमधिकं वदामि प्रतिक्षणम् असौ मे पुत्रः अस्मान् सेवितुम् उद्यतः भवति। केवला अहमेका एव न, अपितु या कापि माता तस्य साहाय्यमिच्छति, सः हृष्टेन मनसा ताः सेवते।

तृतीयायाः जनन्याः वचनानि श्रुत्वा अपरे द्वे जनन्यौ स्वमनसि यदन्वभवताम् तदत्र लिखितुं न शक्यते। तत्तु भवद्भिरेव स्वमनसि अनुभवनीयम् अस्ति। वस्तुतः प्रभूतं धनं व्ययीकृत्यापि वयं स्वकीयान् पुत्रान् (अत्र पुत्रश्बब्देन पुत्रस्य पुर्त्याः च समावेशो भवतीति अवगन्तव्यम्) कीदृशं शिक्षणं प्रशिक्षणं च दातुं प्रवृत्ताः स्मः इति पुनः पुनः विचारणीयम् भवति। अस्माकं पुरातने भारते देशे या गुरुकुलीया पद्धतिः प्रावर्तत सा विना भेदभावं विना व्ययं निःशुल्कमेव सर्वेषां बालकानाम् शिक्षाविधिं कल्पयति स्म। अद्यत्वे तु कथनमात्रमेतत् भवति यत् शिक्षा सर्वस्मै अस्ति इति। परन्तु सत्यं तु इदमस्ति यत् अद्यत्वे यस्य धनं तस्मै एव प्रवर्तते शिक्षा इति। ये खलु निर्धनाः सन्ति तेषाम् कृते विद्याप्राप्तेः अवसरः एव नास्ति। एतादृशेन शिक्षाविधिना अस्माकं देशस्य मानवसमाजः कुत्र गमिष्यति इति प्रतिक्षणं समुत्पद्यमाना चिन्ता मां बाधतेतमाम्। किं भवत्सु अपि एतादृशी चिन्ता उत्पद्यते, उत्पन्ना च चिन्ता किं भवन्तं बाधते न वेति प्रश्नं पृष्ट्वा विरमामि ।। इति शम् ।।

## नवोढा

—डॉ अरविन्दकुमारतिवारी

मामेवं प्रविहाय कांचिदपरां द्रष्टुं गतः प्राक्तनीं
याता रात्रिरये नदन्ति विहगाः सूर्योदयो जायते।
इत्थं हा रमणीह शून्यहृदया दत्वा कपोले करं
निन्दन्त्येव न भाग्यमद्य सुमुखी शेते नवोढा नवा।। 1
कर्णौ स्फालयतीव कुक्कुटरवः सम्बोधयन्मां कथं
श्वश्रूर्भाषत एव गेहचटका सुप्ता प्रभाते वधूः।
हं दत्ते चपला स्वभावपरुषा गालिं ननान्दाद्वयीं
नायातः क्व गतः पतिर्मम गश्हात् कुर्यामहं किं प्रभो।। 2
हं हो किं श्वसुरो ब्रवीति मधुरं श्वश्रूं ततो वारयन्
संकेतेन मनोहरं मश्दु वचः पीयूषतुल्यं हसन्।
भार्ये विस्मश्तमद्य संस्मर निजं कश्त्यं कश्तं यद्गश्हे
मध्याह्ने जननीस्वरेण पिहितं द्वारं त्वयोद्घाटितम्।? 3
हा हा हन्त कुमार एष सुभगो मद्देवरः कोमलः
सर्वान् सारयतीव कार्यवचनान्मां वीक्षितुं व्याकुलः।
वायोर्वेगबलेन सम्प्रति पते मुक्तं कपाटद्वयं
किं ब्रूयामवबोधयेति भगवन् सत्यं मशषा वंचनम्।। 4
दूरात्पश्यति मे प्रिये नयनोरश्रुस्रवो निर्गतो
ज्ञाता हन्त कथावली स्वयमहो सर्वैरपि सत्वरम्।
मा मा ज्ञापय यद्वचः पतिमुखान्मौनं मयाकर्णितं
सस्नेहं सखि सुस्मितं विहसितं सन्दर्शितं कश्त्रिमम्।। 5

**पंचमपुटस्य शेषभागः ''अभिराजराजेन्द्रमिश्रकवेः...**

काव्यसर्जनायाः क्षेत्रे प्रो0 मिश्रः कथयति–'बहरहाल' एतेन फारसी गजलसंविधानेन किं प्रयोजनं संल्भते? अर्थात् न कस्यापि प्रयोजनस्य सिद्धिर्भवति। यतः तेषु–गजलेषु मानवीय भावनानां–संवेदनानां्च ष्षून्यत्वं जायते,तथा च मद्य–कबाबस्त्रीभिः साकं भोगव्यसनाषक्तिनां्च बाहुल्यं दरिदृष्यते,अतः तेषां संविधानस्याचरणं भारतीयैः कदापि न करणीयम्।अस्माकं संस्कृत कविभिःफारसी गजलानां संविधानक मात्रं हि ग्रह्यत्वं जायते,न तु तेषां गजलकाराणां प्रतिपाद्यं ग्रह्यत्वं जायते। यथा–

संविधानकमात्रं हि फारसी गजलाश्रितम्।
ग्रह्यं न च प्रतिपाद्यमित्यभिराजसम्मतम्।। 28

यतः क्वासौ फारसी उर्दुष्च गजलेषु उच्छृङ्खलरागयुक्त जीवनम्? क्वचास्माकमखण्डप्रकाषानन्दचिन्मय पुण्यानां सत्फलीभूतानां भारतीयानां्च रागबन्धः–काव्यमयजीवनम्? तदुक्तम–

क्वासावुच्छृङ्खलो रागः फारसीकाव्यवर्णितः।
रागबन्धः क्व चास्माकमखण्डपुण्यसत्फलम्।।29
क्वचषकाः मदिरोन्मादा उत्पथामदिरालयाः।
क्व च वासगृहायत्ता समर्चा पुष्पधन्वनः।।30
तुरुष्कसंस्कृतिः क्वासौ समुदाचारलङ्घिनी।
संस्कृतिष्चास्मदीयेयं क्व पुनष्षील रक्षिणी।।31
अतो हि विष्वरक्षित्री कविभिस्सैव संस्कृतिः।
गलज्जलिकया वर्ण्या तौरुष्की न कथन्चन।।32
मदिरालयचर्चाभिषारमथवाऽर्चताम्।
कवीनां ननु कल्याणं स्वयमम्बा विचिन्तयेत्।।33
साम्प्रतं भिन्नविस्तारा विभिन्नसंविधानका।
सा गलज्जलिका यत्नात्समुद्धत्य समीक्ष्यते।।34
गजलप्रकारान् वर्णयति कविराजः–
मतलाऽऽरम्भिकावाच्या षेर उच्यते मध्यिका।
अन्तियका च तथैवास्तु मकतेति मतम्मम।।35
तस्माद् गलज्जलेत्याख्या स्याद्गलज्जलिकाऽथवा।
रोचतां संस्कृतेभ्यः इति प्रस्तूयते मया।।36

निष्कर्षः–

सारांषतया वक्तुं ष्षक्यते यत् प्रो0 मिश्रः संस्कृतकविभ्यः सन्देषयति,यत् गलज्जल अथवा गलज्जलिका संज्ञा एव संस्कृतेभ्यः कविभ्यः रोचतां ,न तु फारसी–उर्दूगजलानां प्रतिपाद्यम् अर्थात् संविधानकमात्रं हि ग्राह्यं न पुनः फारसी–उर्दूगजल प्रतिपाद्यं,तत्सगन्धं वा प्रतिपाद्यं यतः भारतीयाचारमर्यादादिभ्यः विसंवादित्वात् कस्यचिद्राष्ट्रस्य साहित्यं तस्य संस्कृतेः दर्पणकल्पं भवति,। यस्मिन् अभावेऽपि भावमुत्पादयति,अनेकतायामेकताम्,वेदनायां–संवेदना,वैषम्येऽपि–सामंजस्यमुत्पादयति। अतः प्रो0 मिश्रः काव्य–परम्परां पुनर्नवां कृत्वा नूतनार्थं विच्छित्तीनां प्रवाहं प्रस्तौति,एवं सहृदयजनानां हृदयेष्वानन्दं पूरयति इति।

सन्दर्भाः पादटिप्पण्यष्च–

1–साहित्यकल्पतरु,सात्यिेन्दु,राजेषकुमारीमिश्र'राजश्री' /पृ0/68
2–औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृ0/68/ 9
3–अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/294
4– औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृ0/46/9
5– औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृ0/100/9
6– औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृष्ठभूमिः/5
7– औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृष्ठभूमिः/6
8– औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृष्ठभूमिः/7
9– औदुम्बरी,मिश्रोऽभिराजराजेन्द्रः/पृष्ठभूमिः/8
1 ?– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/248/1
11– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/248/2
12– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/248/6
13– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/249–25 ?
14– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/251
15– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/284
16– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/285
17– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/285
18– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/285
19– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286
2 ?– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286
21– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286
22– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286/नाट्य0/14/58
23– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286/74
24– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286/75
25– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/286/76
26– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/287/77
27– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/287/78
28– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/29 ?/85
29– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/29 ?/86
3 ?– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/29 ?/87
31– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/291/88
32– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/291/89
33– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/291/9 ?
34– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/291/91
35– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/287/8 ?
36– अभिराजयषोभूषणम,मिश्रोऽभिराजराजेन्द्रः/पृ0/287/79

# वैदिककाले वैदिकं वास्तुस्वरूपम्

कन्हैयाकुमारझा (शोधच्छात्रः)
वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम

वैदिककाले वैदिकं वास्तुस्वरूपम्
कन्हैयाकुमारझा (शोधच्छात्रः)
वास्तुशास्त्रविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

मानवानाम् उद्धाराय ज्ञानराशिः वेदः ऋषिभिरुपदिष्टः सार्वजनीनः विषयोऽस्ति। अत एव तथात्वं वीक्ष्य ऋग्वेदीयभाष्यभूमिकायां सायणः अब्रवीत् यत् इष्टप्राप्तयेऽनिष्टपरिहाराय अलौकिकोऽपायप्रवेदकः वेदः इति। इष्टप्राप्तिः तु यायावरीय परम्परायां न भवितुमर्हति यतः तत्र इष्टविषयकचिन्तनस्य अभावो दृश्यते। भवतु मानवीयविकासपरम्परायां यदा मनोरपत्याः सुदृढाः जाताः तत्र उचितानुचितकर्त्तव्यबोधवन्तः जाताः तस्मिन् प्राबौद्धिकविकासकाले प्रथमावश्यकतात्वेन तैः परिगणितं किमपि वस्तुजातं तद्धितेषु नैजः वास्तुः प्रथमः आसीदेव यतः अत्रैव यायावरीय विनाशसाधकता इति। भवतु यत्किमपि तत्त्वं परं वैदिककाले वास्तोः स्वरूपं दृश्यते अतस्तद्विवरणाय कानिचन प्रमाणानि समुपस्थाप्यन्ते इति।

ऋग्वेदे वास्तुतत्त्वस्वरूपम्- ऋग्वेदे बहुषु स्थलेषु वास्तोः स्वरूपं दृश्यते तत्र कुल-ग्राम-जन-विश-राष्ट्रस्य स्वरूपम् अत्र दशमे मण्डले दृश्यते। वास्तुशास्त्रीयमीमांसायां ग्रामादीनां स्वरूपं स्पष्टतः अस्तीति जानन्ति वास्तुशास्त्राविः। अत्र कतिपयपदार्थोत्पत्तिः तु '' ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत्। ततो रात्र्यजायत् ततः समुद्रो अर्णवः।। (ऋ0 1.190.1) अत्र विशिष्टावासीयस्वरूपम् दृश्यते इत्थम्। अत्र अग्निशालायाः स्वरूपं दृश्यते। अत्र कुण्डादीनां मण्डपादीनां कल्पना स्वतः सिद्धा ततः प्राह वास्तुकर्म अपि सिद्धम्।

. अत्र हविर्धानम् अर्थात् भाण्डागारस्य स्वरूपं दृश्यते सन्दर्भेऽस्मिन् वास्तुशास्त्रे महती चर्चास्ति यत् क्व भाण्डागारः निर्मातव्यः इति।

. पत्नीसहम पोष्ठः तल्पः इत्यादीनां पदानामनुशीलनेन ज्ञायते यत् ऋग्वैदिककाले वास्तुशास्त्रं पल्लवितं पुष्पितञ्चासीत्।

. अत्र वास्तुशास्त्रीयविविधदेवानां सूक्तमपि दृश्यते अतोऽनुमीयते यत् तदा वास्तुशास्त्रानुगुणकर्म भवति। अत्र पुरन्दरः पुरं दारयतीति व्युत्पत्या तदा पुरकल्पनं समुचितं प्रतिभाति ।

. जीवेषु काम शब्दप्रयोगः वर्तते तस्याऽर्थः वास्तुरिति। एतावता यदि विमृश्यते तर्हि ज्ञायते यत् ऋककाले जनानां स्थितिः समुचिता सुदृढा वास्त्वनुकूला आसीत् इति।

भवननिर्माणाय वास्तुकला, वा वास्तुविद्यायाः महत्त्वपूर्णं स्थानं वर्तते। वास्तुविद्यायाः विकासो मानवसभ्यतायाः विकासेन सह अभवत्। केचन विद्वांसः वैदिकसाहित्येन सहैव वास्तुशास्त्रस्योद्गमः मन्यन्ते। वास्तुशास्त्रमिदं प्रचीनतमम् अत्र वेदमूलकता सर्वथा सुप्रतिष्ठिता। भारतीयवास्तुविद्यायाः उद्गमः ऋग्वेदाद् भवति। ऋग्वेदस्य अनेके स्थले वास्तुसम्बन्धिनः अनेकानि पर्यायपदानि प्रयुक्तानि वर्तन्ते। सर्वप्रथं वास्तुशब्दस्य प्रयोगः भवननिमित्तं क्रियते। यथा– तां वां वास्त्वुश्मसि गमध्यै सद्म, पार्थिवम् , मृण्मयं गृहम् , बृहन्तं क्षयसमं समं जनानाम् , छदसि गृहम् , सदनानि कृत्रिमा , यमस्य सादनं , सदन , पृतनासाल , चास्कम्भ चित् कम्भेनन स्कभीयान् , स्थूणेव सुमिता दृहतं द्यौः , भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवानाम् चित्रम् , महोभिः शतं पूर्भिरासीभिः , शतमश्ममयीनां पुरमिन्द्रो व्यास्यत् , मा अस्मत् पुरोत् जारिषु , तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि , आयस्यनाधृष्टो नृपीतये पूर्भवा शतभुजि , पुरः कृणुध्वमायसीरधृष्टाः , आदृल्हां पुरं विविश , दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि वाहन , अन्ने चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम् , देवि द्वारो बृहन्तं मानं वरुणस्वधावः सहस्रद्वारं जगमा गृहं ते द्रुमशब्दः काष्ठेन निर्मितः स्तम्भः वा शाखायाः वाचको भवति यस्योऽपरि युवतीनामाकृतयः निर्माणं क्रियते स्म । उदातैर्जिहते बृहद् द्वारो देवीः हिरण्ययीः ऋग्वैदिकवास्तुकर्मणः शिल्पस्य च प्रमुखं साधनं माध्यमञ्च वृक्षस्य काष्ठं भवति स्म। अनया दृष्ट्या इष्टकानां समूहेन यज्ञवेदी निर्मीयते इष्टि शब्दस्य प्रयोगः इष्टस्य चयने भवति। दुर्यो न यूपः इत्यरिक्तं देवानां मनुष्याणां कृते रथः प्रमुखयानं भवति। ऋग्वेदे रथाङ्गानां विस्तृतरूपेण उल्लेखः लभ्यते – सप्तचक्रं सप्त वहन्त्यश्वाः च उल्लेखोऽपि दृश्यते। तत्र मुख्यरूपेण अस्य मन्त्रस्य वास्तोष्पतेः प्रार्थनाऽस्ति। वास्तुपुरुषस्य वास्तुदेवस्य चावधारणा स्पष्टतया दृश्यते।

ऋग्वेदानन्तरं यजुर्वेदे विभिन्नानि स्थलानि सन्ति यत्र वास्तुशब्दस्य प्रयोगाः मिलन्ति। ते च प्रयोगाः निम्नलिखितप्रकारेण वर्णिताः सन्ति। (यजुर्वेदग्रन्थस्योऽपरि सातवलेकरमतानुसारेण भाष्येण) यथा–

वेषाय वां , पृथुबुध्नः ग्रावाऽसि , धाम्ने धाम्ने , गृहपते अग्ने (एषु मन्त्रेषु केवलं गृहसम्बन्धिचर्चा वर्तते) न गृहान्न दत्त , गोष्ठे , गृहपते , गृहान्नौमि , इह न गृहेषु गावः उपहूता , यत् ग्रामे , यथा नः वस्यसस्करत् , शिल्पे स्थस्ते , यजमानस्य गृहान्न , गयस्फानः , गह्वरेष्ठा , गोष्ठम् , क्षयस्य (ऐश्वर्ययुक्तगृहस्य संज्ञा ज्ञायते) , वासना:, पत्स्यासु , गृहपति , भरन्तोऽश्वायेव(अश्वशाला) गोमन्तः , विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य(अस्मिन् मन्त्रे विश्वकर्मणा गृहनिर्माणम् वर्णितमस्ति) ग्राम्याः , वरूथ्यः , प्रतिमा , वास्तव्याय च वास्तुपाय च , सदनमा , मातृका , वसतिश्च , यत पूर्तम्(कूप-तडागयोः निर्माणनिमितम्) , यद् ग्रामे यत्सभायां , पुरन्धि र्योषा( स्त्रीः सर्वगुणसम्पन्न-नगरस्य नेतृत्वकतृ) त्वष्टः , सदान्यं , वास्यं इत्यादयश्च।

वैदिकसंहितासु वास्तुशास्त्रस्य प्रचुरसामग्री उपलभ्यते। यथा- धार्मिककर्मकाण्डे यज्ञवेदीनां निर्माणम्, इष्टिकानां नामानि, तेषां प्रकारः प्रयोगश्च जनोपयोगीवास्तुषु प्रासाद-राजप्रासाद-जनगृहादीनां निर्माणम्, पशूनाम् उपयोगाय अपि तत्र सदनानां प्रयोगो मिलति। तत्र वर्णनं मिलति यत् वैदिकार्याः कृषकाः पशुपालनार्थं पशूनामनुकूलतायै अरण्यानां मध्ये स्थितग्रामेषु निवसन्ति स्म। ऋग्वेदे ग्रामशब्दस्य प्रयोगोऽपि बहुषु स्थलेषु मिलति। पाषाणैः निर्मितदुर्गाणां वर्णनं 'अश्मयी' नाम्ना तथा लोहनिर्मितपुराणां वर्णनम् 'आयसीपुः' इति नाम्ना मिलति। ब्राह्मणग्रन्थेषु वर्णितानां पुरी, पुरम्, पुः इत्यादीनां वर्णनं तत्कालीनवास्तोः उन्नतस्थितेः सूचकाः सन्ति। ऋग्वैदिकार्याणां जीवनं सुखमयं संतुष्टञ्चासीत्। तत्र एकस्मिन् स्थाने सहस्रस्थाणुभिः निर्मितभवनस्योल्लेखः मिलति यत्र नृपो निवसति स्म। गृहसूत्रेषु उल्लिखिते गृह्यप्रवेशे वास्तोष्पतेः पूजनेन ज्ञानं भवति यत् वास्तोष्पतिः गृहरक्षकदेवोऽस्ति। अस्य देवस्य प्रार्थनायां नीरोगता-धनसम्पत्ति-पशुसम्पत्तीनां प्रार्थनायाः इतर योगक्षेमयोः अपि याचना अस्ति। यथा- पाहि क्षेमे उत योगे वरं नः।

यजुषि वास्तोः स्वरूपम् - अत्र यजुषि यज्ञमण्डपनिर्माणाय विशिष्टतदङ्गीभूतवेदिका निर्माणाय 10800 इष्टिकानां प्रयोगः तदीयः आकारः स्थानं च निर्धारितम् आसीत्। तत्र नमकाध्याये वास्तव्यत्वेन वास्तुपायत्वेन च शिवः स्मृतः तथाहि- '' नमो वास्तव्याय च वास्तुपाय च नमः इति एतावता यजुषि अपि वास्तोः स्वरूपं दृश्यते।

अथर्ववेदेऽपि वास्तुरचनाया उल्लेखो मिलति। तत्र वंशादिभिः विनिर्मितानां स्तम्भानां वर्णनं, पर्णकुटीनिर्माणे विस्तृतभवननिर्माणे च मिलति। तत्र भवनांगरूपे गोष्ठीशाला, भण्डारशाला, आन्तरिकशाला, यज्ञशाला अतिथिशालादीनां च वर्णनं मिलति।

अथर्ववेदस्य उपवेदो वर्तते स्थापत्यवेदः अत्र वास्तुशास्त्रम् समाहितम् अस्ति। अत्र पौष्टिकसूक्ते गृहनिर्माणम् तत्त्वस्वरूपञ्चादयः वर्णिताः सन्ति। अत्र अग्नि-उत्पातरक्षायै विधानं दृश्यते-

आयने ते परायणे दूर्वा रोहतु पुष्पिणी
उत्सो वा तत्र जायतां ह्रदीव पुण्डरीकमान् ।
हिमस्य त्वा जरायुणा शाले परिव्ययामसि
शीतह्रदा हिनो भुवोऽग्निष्कृणोतु भेषजम् (अर्थ वे 6.106.01-3)

एतावता वक्तुं शक्यते यत् वास्तोः स्वरूपस्य विकासः वैदिक काले दृश्यते। अस्य समेधनम् उत्तर कालेऽभवत् यतः तत्कालीनसमाजः वैदिकप्रक्रियायामावृतः आसीत्। इति दिक्।

1 ऋग्वेद 1/154/6
2 ऋग्वेद 1/38/10, 5/87/7
3 तत्रैव 5/89/1
4 तत्रैव 10/87/8
5 तत्रैव 10/85/10
6 तत्रैव 1/55/6
7 तत्रैव 10/135/7
8 तत्रैव 1/144/2
9 तत्रैव 10/103/7
10 तत्रैव 10/111/5
11 तत्रैव 5/45/2
12तत्रैव 10/107/10
13 तत्रैव 7/3/7
14तत्रैव 4/3/20
15 तत्रैव 1/139/8
16 तत्रैव 7/3/7
17 तत्रैव 7/15/14
18 तत्रैव 10/101/8
19 तत्रैव 5/19/2
20 तत्रैव 4/28/3
21 तत्रैव 8/27/18
22 तत्रैव 5/62/6
23 तत्रैव 7/88/5
24 तत्रैव 4/32/23
25 तत्रैव 9/5/5
26 तत्रैव 1/162/5
27 तत्रैव 10/14/8
28 तत्रैव 1/51/14
29 तत्रैव 3/53/17
30 तत्रैव 1/64/3
31 तत्रैव 7/54/1
32 शुक्ल यजुर्वेद अ-1/6
33 शुक्ल यजुर्वेद 1/26
34 तत्रैव 1/30
35 तत्रैव 2/27
36 तत्रैव 2/32
37 तत्रैव 3/21
38 तत्रैव 3/39
39 तत्रैव 3/40
40 तत्रैव 3/43
41 तत्रैव 3/45
42 तत्रैव 3/58
43 तत्रैव 4/9
44 तत्रैव 4/33-34
45 तत्रैव 4/37
46 तत्रैव 5/8
47 तत्रैव
48 तत्रैव 8/6
49 तत्रैव1 10/7
50 तत्रैव 10/9
51 तत्रैव 11/75
52 तत्रैव 12/28
53 तत्रैव 14/14
54 तत्रैव 14/29
55 तत्रैव 15/48
56 तत्रैव 15/65
57 तत्रैव 16/44
58 तत्रैव 17/87
59 तत्रैव 18/13
60 तत्रैव 18/15
61 तत्रैव 18/71
62 तत्रैव 20/17
63 तत्रैव 22/22
64 तत्रैव 27/20
65 तत्रैव 34/21
66 तत्रैव 40/1

# 'मनोगतम्' - 40

## प्रसारण-तिथिः - 28-जान्युआरि'2018

## - भाषान्तर-कर्ता - बलदेवानन्द-सागरः

मम प्रियाः देशवासिनः, नमस्कारः। अष्टादशोत्तर-विंशति-शततमस्य वर्षस्य इदं प्रथमं 'मन की बात' - इति प्रसारणम्, अपि च, दिवस-द्वय-पूर्वमेव वयं गणतन्त्र-पर्वणः आयोजनम् अतितराम् उत्साहेन कृतवन्तः। इतिहासे प्रथम-वारमेव एतत् जातं यत् दश-संख्याकानां देशानां प्रमुखाः समारोहेह्यस्मिन् समुपस्थिताः आसन्।

मम प्रियाः देशवासिनः, श्रीमान् प्रकाश-त्रिपाठी NarendraModiApp- इत्यत्र दीर्घमेकं पत्रम् अलिखत्, तथा च, साग्रहं माम् अकथयत् यत् तस्य पत्रे लिखितान् विषयान् नूनमहं सन्दर्भयेयम्। सः अलिखत् यत् फेब्रुआरि-मासे प्रथमे दिने अन्तरिक्षङ्गतायाः कल्पना-चावला-इत्यस्याः पुण्य-तिथिः वर्तते। कोलम्बिया-अन्तरिक्ष-यान-दुर्घटनायां सा अस्मान् त्यक्त्वा गत-प्राणाजाता परञ्च जगति सा लक्षशो यूनां प्रेरणादायिनी सिद्धा। अहं भ्रातुः प्रकाश-वर्यस्य कार्तज्ञ्यम् आवहामि यत्तेन स्वीये दीर्घे पत्रे कल्पना-चावला-प्रयाणम् आरम्भे एव सन्दर्भितम्। एतत्तु अस्माकं सर्वेषां कृते दुःखदं यत् अल्पीयसि एव वयसि सा दिवङ्गता परञ्च सा स्वीय-जीवनेन, अशेष-जगति विशेषेण च भारतस्य लक्षशो बालिकाभ्यः इदं समदिशत् यन्-नारी-शक्तिः असीमितास्ति। यदि इच्छा दृढ-संकल्पः च स्तः, किञ्चित् नूनं करणीयमिति दृढ-भावः अस्ति चेत् न किञ्चिदपि असम्भवम्। एतद्-दृष्ट्वा मनः प्रसीदतितरां यद् अद्यत्वे भारते महिलाः प्रत्येकमपि क्षेत्रे द्रुत-गत्या अग्रेसरन्ति, देशस्य गौरवं विवर्धयन्ति।

प्राचीन-कालात् अस्मदीयेह्यस्मिन् देशे महिलानां सम्माननं,समाजे तासां स्थानं, तासाञ्च योगदानम्, एतत् सर्वं सततं सम्पूर्णमपि विश्वम् आश्चर्य-चकितं करोति। भारतीय-विदुषीणां दीर्घा परम्परा प्रवर्तते। वेदानां ऋचानाम् आविष्करणे भारतस्य अनेकासां विदुषीणाम् ऋषिकाणां च सुबहु योगदान- मासीत्। लोपामुद्रा, गार्गी, मैत्रेयी, अपाला चेत्यादयः - न जाने कति कति नामानि सन्ति? अद्यत्वे वयं 'कन्यां रक्ष, कन्यां पाठय' - इति प्रयतामहे परञ्च सहस्राब्देभ्यः प्राक् अस्मदीयेषु शास्त्रेषु,स्कन्द-पुराणे कथितम्:-

दशपुत्र-समा कन्या, दशपुत्रान् प्रवर्धयन्।

यत् फलं लभते मर्त्यः, तल्-लभ्यं कन्यकैकया ।।

अर्थात्, एका पुत्री दश-पुत्रैः तुल्या भवति। दशभिः पुत्रैः यत् पुण्यं प्राप्यते, एकया पुत्र्या तत् पुण्यं लभ्यते। तथ्यमिदं अस्मदीय-समाजे नार्याः महत्वं दर्शयति। अत एव, अस्मदीये समाजे नारी 'शक्ति-स्वरूपा' इति प्रतिष्ठापितम्। एषा नारी-शक्तिः सम्पूर्णमपि देशम्, अशेषं समाजम्, कृत्स्नमपि कुटुम्बञ्चएकता-सूत्रेण आबध्नाति भवन्तु नाम ताः वैदिक-कालिकाः विदुष्यः-लोपामुद्रा-गार्गी-मैत्रेयी-प्रभृतयः:- तासां विद्वता वा अक्का-महादेवी-मीराबाई-प्रभृतीनां ज्ञानं वा भक्तिः, भवतु वा सा अहिल्याबाई-होलकरस्य शासन-व्यवस्था, आहोस्वित् भवतु सा राज्ञ्याः लक्ष्मीबाई-वीराङ्गनायाः वीरता - नारी-शक्तिः सर्वदैव अस्मान् अनारतं प्रेरयति स्म, सततञ्च प्रेरयति। देशस्य मानं सम्माननञ्च विवर्धयन्ती प्रवर्तते।

श्रीमान् प्रकाश-त्रिपाठी इतः परमपि अनेकानि उदाहरणानि प्रादात्। सः अलिखत् यत् अस्मदीया साहसिका प्रतिरक्षा-मन्त्रि-वर्या निर्मला-सीतारमण-महाभागा यया 'सुखोई-त्रिंशत्' इति योद्धृ-विमानेन उड्डीतम्, तच्च, नूनं प्रेरणादायि। सः वर्तिका-जोशी-इत्यस्याः नेतृत्वे भारतीय-नौसेनायाः महिला-सदस्य-वृन्दस्य आई-एन्-एस्-वी-तरिणी-द्वारा (INSV Tarini) अशेष-विश्वस्य परिक्रमा-विषयम् उल्लिखितवान्। भावनाकण्ठ-मोहना-सिंह-अवनी-चतुर्वेदीति तिस्रः साहसिक-महिलाः याः योद्धृ-विमान-चालिकाः सञ्जाताः साम्प्रतञ्च सुखोई-त्रिंशत्-विमानेषु प्रशिक्ष्यन्ते। क्षमता-वाजपेयि-वर्यायाः नेतृत्वे All WomenCrue- इति सर्वाभिरपि महिला-सदस्याभिः समन्वितेन Air India Boeing Jet-विमानेन दिल्लीतः अमेरिका-देशस्य SanFrancisco-नगरं यावत् ततश्च परावृत्य दिल्ली-पर्यन्तम् उड्डीतम्। भवता सम्यग् कथितम् - यद् अद्यत्वे नारी, प्रत्येकमपि क्षेत्रे न केवलम् अग्रेसरति, परञ्च नेतृत्वमपि करोति। अधुना अनेकानि तादृंशि क्षेत्राणि सन्ति यत्र सर्वप्रथमं, अस्मदीया नारी-शक्तिः किञ्चित् नावीन्यं प्रमाणयति। अभिनवं कीर्तिमानं प्रतिष्ठापयति। विगतेषु दिनेषु माननीयः राष्ट्रपति-महोदयः नवीन-प्रयासम् प्रारभत।

राष्ट्रपति-महोदयः असाधारण-महिलानां वृन्दमेकं अमिलत् याः स्व-स्व-क्षेत्रेषु सर्व-प्रथमं किमपि उत्कृष्टम् अकुर्वन्। नूतनं कीर्तिमानं प्रतिष्ठापितवत्यः। देशस्य एताः महिलाः सन्ति - First female Merchant Navy Captain- इति नौ-सेनायाः प्रथमा पोत-चालिका, passenger-train- इति यात्रि-रेलयानस्य प्रथमा महिला-चालिका, रेलयानस्य प्रथमा महिला-चालिका, Fire-Fighter-इति अग्निशमन-यानस्य प्रथमा महिला-चालिका, प्रथमा महिला बस-यान-चालिका,Antarctica- इति दक्षिणीय-ध्रुवं सम्प्राप्ता प्रथमा महिला, ऐवरेस्ट- इति सर्वोच्च-पर्वत-शिखरम् आरूढवती प्रथमा महिला - एवं हि प्रत्येकमपि क्षेत्रे 'First Ladies'-इति अस्मदीयाः प्रथमाः नारी-शक्तयः समाजस्य रूढिवादिताम् अपाकुर्वत्यः असाधारणाः उपलब्धीःअवाप्नुवन्, कीर्तिमानानि च प्रतिष्ठापितवत्यः। एताः इदं प्रदर्शितवत्यः यत् कठोर-श्रमं निष्ठां दृढसंकल्पञ्च आधृत्य सर्वाः अपि बाधाः विघ्नान् चातिक्रम्य नूनं नवीनं मार्गमुपकल्पयितुं शक्यते। तादृशः नवीनः मार्गः यः न केवलं स्वीय-समकालीनानां जनानां कृते अपि तु, भावि-प्रजानां कृतेह्यपि प्रेरकः स्यात्। नूतनया शक्त्या नवीनेन च उत्साहेन तान् आपूरयेत्। एताः समुपलब्धवतीः प्रथमाः महिलाः आलक्ष्य एकं पुस्तकमपि सज्जीकृतमस्ति येन हि अशेष-देशः आसां नारी-शक्तीनां विषये अवगताः स्युः, एतासां जीवनेभ्यः कार्येभ्यश्च प्रेरिताः भवेयुः। पुस्तकमिदं NarendraModi-website इत्यत्र e-book-रूपेणापि समुपलभ्यते।

साम्प्रतं देशे समाजे च सञ्जायमाने सकारात्मके परिवर्तने देशस्य नारी-शक्तेः महत्वपूर्णा भूमिका वर्तते। अद्य वयं यदा महिला-शक्तीकरणस्य चर्चां कुर्वन्तः स्मः तदा अहमेकं रेलास्थानकं सन्दर्भयितुमीहे। रेलास्थानकं महिला-शक्तीकरणञ्च, भवन्तः नूनं विचारयिष्यन्ति यदनयोः मध्ये कः सम्बन्धः ? मुम्बय्याः माटुंगा-स्टेशन-इति रेलास्थानकं भारतस्य प्रप्रथमं रेलास्थानकं वर्तते यत्र सर्वाः अपि कर्मकराः महिलाः एव सन्ति। सर्वेषु विभागेषु महिला-कर्मचारिण्यः - आहत्य चत्वारिंशदधिकाः महिलाः सन्ति। ऐषमः गणतन्त्र-दिवसीयानि सामूहिक-प्रयाणानि दृष्ट्वा Twitter- इत्यत्र अन्येषु च Social Media-इति सामाजिक-माध्यमेषु जनैः लिखितं यत् अत्र मुख्यम् आकर्षणम् आसीत् - BSF Biker Contingent- सीम-सुरक्षा-बलस्य बाइक-यान-चालिकानां वृन्दं यस्मिन् सर्वाः अपि महिला-चालिकाः आसन्। एताःसाहसपूर्ण-प्रयोगं कुर्वन्त्यः आसन्, अपि चेदं दृश्यं वैदेशिकान् अतिथीन् अपि आश्चर्यचकितान् करोति स्म। शक्तीकरणं हि आत्मनिर्भरतायाः एव अनन्यतमं रूपम्। साम्प्रतम् अस्मदीया एषा नारी-शक्तिः नेतृत्वं करोति। आत्मनिर्भरा भवति। सद्यः स्मरामि यत्,छत्तीसग? स्य अस्मदीयाः आदिवासि-महिलाः आश्चर्यम् अजनयन्। एताः नूतनोदाहरणं प्रस्तुतवत्यः। आदिवासि-महिलानां यदा उल्लेखः भवति तदा अस्माकं सर्वेषां मनस्सु एकं सुनिश्चितं चित्रम् उत्पद्यते। यत्र अरण्यं भवति, पाद-मार्गो भवति, तस्मिन् काष्ठ-भार-वाहिन्यः महिलाः प्रचलन्त्यः दृश्यन्ते। परञ्च छत्तीसगढ़ स्य अस्मदीयाः आदिवासि-नार्यः, अस्मदीया एषा नारी-शक्तिः देशस्य सम्मुखं एकं नवीनं चित्रं व्यरचयत्। छत्तीसगढ़ स्य दंतेवाड़ा-क्षेत्रं यद्धि, माओवाद-दुष्प्रभावितं वर्तते। हिंसा,अत्याचरणम्,बम-इति विस्फोटकम्, भुशुण्डिका, लघु-भुशुण्डिका - माओवादिनः - एतानि आधृत्य भयानकं परिवेशं निर्मितवन्तः। एतादृशेषु भयावहेषु क्षेत्रेषु आदिवासि-महिलाः,E-Rickshaw-इति चक्रिकायानानि चालयित्वा आत्मनिर्भराः भवन्ति। अल्पीयसि कालखण्डे अनेकाः महिलाः अमुना कार्येण संयुताः जाताः। एवं हि लाभ-त्रयं सिद्ध्यति - एकतः स्व-वृत्तितया एताः शक्ताः भवन्ति, अपरतश्च अमुना कार्येण माओवाद-दुष्-प्रभावितस्य क्षेत्रस्य परिदृश्यमपि परिवर्तते। तथा च, युगपदेव अनेन पर्यावरण-संरक्षणस्य कार्यमपि सबलं भवति। अत्रत्यं जनपद-प्रशासनमपि प्रशंसार्हं वर्तते, येन अनुदानादिकम् उपलम्भयित्वा आभ्यः प्रशिक्षणादिकमपि प्रदीयते, एवं हि जनपद-प्रशासनेन आसां महिलानां सफलतावाप्तौ महत्वपूर्णा भूमिका निर्व्यूढास्ति।

वयं पुनः पुनः शृण्वन्तः स्मः यत् जनाः कथयन्ति- 'कुछ बात है ऐसी कि हस्ती मिटती नहीं हमारी'। 'किञ्चिद् वैशिष्ट्यमस्ति तादृशं यदस्तित्वं अविनाशि अस्मदीयम्'- तत् किमस्ति? तदस्ति,Fle&ibility - आनम्यता, परिवर्तनशीलत्वम्, रूपान्तरत्वम्। यद्धि काल-बाह्यमस्ति, तत् त्याज्यम्, यद्धि



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

आवश्यकम्, तस्य परिष्कारः स्वीकर्तव्यः। अपि च अस्मदीय-समाजस्य विशेषता वर्तते- आत्म-परिष्कारस्य अनारतं प्रयासः,Self-Correction, एषास्ति भारतीया परम्परा, एषा अस्माकं संस्कृतिः अस्मभ्यं रिक्थत्वेन अधिगतास्ति। कस्यचन अपि जीवन-समाजस्य अभिज्ञानं भवति तस्य- ह्व आत्म-परिष्कारस्य तन्त्रम्। सामाजिक-कुप्रथाः कुरीतीश्च विरुध्य सहस्राब्देभ्यः अस्माकं देशे व्यक्तिगतेषु सामाजिकेषु च स्तरेषु सततं प्रयासाः भवन्तः आसन्। नातिचिरं बिहार-राज्ये रोचकः प्राथमिकः प्रयासः अभवत्। राज्ये सामाजिक-कुरीतीः समूलम् उन्मूलयितुं त्रयोदश-सहस्र-किलोमीटरमिताधिका विश्वस्य दीर्घतमा मानव-शृङ्खला, ॥ uman Chain- विरचिता। अमुना अभियानेन बाल-विवाह-यौतुक-प्रथा-सदृशीः कुरीतीः विरुध्य जनेषु जागृतिः प्रसारिता। यौतुक-बालविवाह-सदृशीः कुरीतीः विरुध्य अशेष-राज्यं योद्धुं संकल्पितवत्। आबाल-महिला-वृद्धाः युवानश्च, सोत्साहं अस्मिन् अभियाने सहभागिनः आसन्। पटना-नगर्याः ऐतिहासिकात् गान्धि-मैदान-स्थलात् आरभ्य मानव-शृङ्खला एषा राज्यस्य सीम-प्रदेशं यावत् अविच्छिन्न-रूपेण संकलिता जाता। समाजस्य सर्वेह्यपि जनाः समुचित-रूपेण विकासस्य लाभान् अवाप्नुयुः इति कृत्वा एतदावश्यकं यत् अस्माकं समाजः एताभ्यः कुरीतिभ्यः मुक्तः स्यात्। आगच्छन्तु, वयं सर्वे मिलित्वा समाजात् एताः कुरीतीः अपास्तुं प्रतिज्ञां करवाम तथा च, एकं नवीनं शक्तं सबलं समर्थञ्च भारतं निर्मातुं प्रयतेम। अहं बिहारस्य जनान्, राज्यस्य मुख्यमन्त्रिणं, तत्रत्यं प्रशासनं मानव-शृङ्खलायां सहभागिनः प्रत्येकमपि जनान् च अभिनन्दामि, वर्धापयामि यत् ते समाज-कल्याण-दिशि विशिष्टां व्यापिनीञ्च प्रक्रियाम् आरभन्त।

मम प्रियाः देशवासिनः, कर्नाटकस्य मैसूरुतः, श्रीमान् दर्शनः MyGov- इत्यत्र अलिखत् - तस्य पितुः उपचारार्थं प्रतिमासं षट्-सहस्र-रूप्यकात्मकः व्ययः भवति स्म। सः पूर्वं प्रधानमन्त्रि-जनौषधि-योजना-विषये नैव जानाति स्म। परञ्च सम्प्रति यदा सः जनौषधि-केन्द्र-विषये सूचनाम् अलभत, ततश्च औषधि-क्रयणं व्यदधात्, ततः प्रभृति एष व्ययः प्रतिशतं पञ्च-सप्तति-मित्या अपचितः। सः वाञ्छति यदहं 'मन की बात'- प्रसारणे एतद्विषये उद्घोषयेयं येन अधिकाधिकाः जनाः एतद्विषये अवगताः स्युः, अमुना च लाभान्विताः भवेयुः। विगतेभ्यः कतिपयेभ्यः दिनेभ्यः अनेके जनाः एतद्विषये मां लिखन्ति स्म, सूचयन्ति स्म। अहमपि सामाजिक-संचार-माध्यमेषु दृष्टवान् यदनेके जनाः अनया योजनया लाभान्विताः अभूवन्। तथा च, यदा एतादृशी सूचना अवाप्यते तदा हर्ष-प्रकर्षः अनुभूयते। गभीरः सन्तोषः जायते। एतदपि मह्यम् अतितराम् अरोचत यत् श्रीमान् दर्शनः स्वीय-मनसि विचारमिमम् अनुभूतवान् यत् यत्किमपि तेन लब्धं तद् अन्येह्यपि अवाप्नुयुः। अस्याः योजनायाः उद्देश्यमस्ति - स्वास्थ्य-परिचर्या सुलभा स्यात्, अपि च, Ease of Living- जीवनस्य सरलता प्रोत्साहिता भवेत्। जनौषधि-केन्द्रेषु प्राप्याः औषध्यः, आपणेषु विक्रीयमाणाभ्यः चिन्हिताभ्यः औषधीभ्यः प्रायेण प्रतिशतं पन्चाशतः नवति-मित्या न्यूनार्घाः भवन्ति। अमुना जन-सामान्यम्, विशेषेण प्रतिदिनम् औषधीः सेवमानानां वरिष्ठ-नागरिकाणां कृते अतितराम् आर्थिकं साहाय्यम् प्राप्यते, भूरिशः सञ्चयो भवति। साम्प्रतं अशेष-देशे त्रि-सहस्राधिकानि जनौषधि-केन्द्राणि स्थापितानि सन्ति। अनेन न केवलं औषधयः न्यूनार्घाणि प्राप्यन्ते अपि तु, वैयक्तिक-उद्यमिनां कृतेह्यपि वृत्तितायाः नवीनाः अवसराः अवाप्यन्ते। प्रधानमन्त्रि-भारतीय-जनौषधि-केन्द्रेषु चिकित्सालयेषु च 'अमृत-संग्रहेषु' एताः न्यूनार्घाः औषधयः लभ्यन्ते। अत्र इदमेव उद्दिष्टं यत् - देशस्य निर्धनतमाः जनाः गुणवत्ता-युतां सुलभां न्यूनार्घाञ्च स्वास्थ्योपचर्याम् अवाप्नुयुः येन हि स्वस्थस्य समृद्धस्य च भारतस्य निर्माणं सम्भवं भवेत्।

मम प्रियाः देशवासिनः,महाराष्ट्रस्य श्रीमान् मंगेशः NarendraModi-MobileApp- इत्यत्र चित्रमेकं प्राहिणोत्। तच्चित्रं तादृशमासीत् यन्मम ध्यानं सहसा तदाकृष्टं जातम्। तस्मिन् पौत्रः निज-पितामहेन साकं 'Clean Morana River'- इति

स्वच्छताभियाने सहभागित्वम् आवहति। अहं ज्ञातवान् यत् अकोला-क्षेत्रीयाः नागरिकाः 'स्वच्छ-भारताभियानस्य' अन्तर्गतं मोरना-नद्याः स्वच्छीकरणार्थं स्वच्छताभियानम् आयोजितवन्तः। मोरना-नदी, पूर्वम् आवर्षं सजला वहति स्म, साम्प्रतं सा ऋतु-निष्ठा सञ्जाता। अपरो वेदना-विषयः आसीत् यत् एषा नदी, पूर्णरूपेण आरण्यकैः ग्रासैः, जलकुम्भिभिः समाकीर्णा सञ्जाता। नद्याम् अस्याः तट-प्रदेशे च प्रभूतः अवकर-प्रक्षेपः क्रियते स्म। एका action plan-इति कार्य-योजना सज्जीकृता, तथा च, मकर-संक्रान्तितः एक-दिन-पूर्वं, जान्युआरि-मासे त्रयोदश-दिनाङ्के 'Mission Clean Morana'- इत्यस्य प्रथम-चरणस्य अन्तर्गतं किलोमीटर-चतुष्कस्य क्षेत्रे चतुर्दश-स्थानेषु मोरनानद्याः तटम् अभितः स्वच्छीकृतम्। 'Mission Clean Morana'- इत्यस्याः पुण्य-कार्ये अकोला-क्षेत्रस्य षट्-सहस्राधिकाः नागरिकाः,शताधिकानि NGOs-इति स्वैच्छिक-संघटनानि, महाविद्यालयाः, विद्यार्थिनः, बालाः, वृद्धाः, मातरः, भगिन्यः - सर्वेऽपि अत्र सह-भागित्वम् आवहन्। ऐषमः जान्युआरि-मासे विंशति-दिनेऽपि एतत् स्वच्छताभियानं सततं प्रवर्तितम्, तथा च, अहं सूचितः यत् यावदवधि मोरना-नदी पूर्णतया स्वच्छा नैव भवति, अभियानमेतत् प्रति-शनिवासरं प्रातः प्रवर्तिता। एतत् प्रमाणयति यत् जनः यदि किमपि कर्तुं दृढ-संकल्पं करोति चेत् तदा किञ्चिदपि अशक्यं नास्ति। जनान्दोलनमाध्यमेन बृहत्तमानि परिवर्तनानि कर्तुं शक्यन्ते। अहं अकोला-वासिनः, अत्रत्ये जनपद-नगर-निगमयोः प्रशासने च, एतत्कार्यं जनान्दोलन-रूपेण प्रवर्तयितुं संलग्नान् सर्वान् नागरिकान् च, तेषामेषां प्रयासानां कृते भूरिशः वर्धापयामि, अपि च कामये यत् भवताम् एते प्रयासाः देशस्य अन्येषां जनानां कृतेऽपि प्रेरणा-दायिनो भवेयुः।

मम प्रियाः देशवासिनः, एतेषु दिनेषु भवन्तः अपि पद्म-पुरस्कार-विषयिणीं चर्चां शृण्वन्ति -इति मन्ये। वार्तापत्रेषु, दृश्य-वाहिनीषु चापि विषयेऽस्मिन् ध्यानमाकृष्यते। परञ्च, यदि किञ्चित् सूक्ष्मेक्षिकया पश्यन्तु चेत् भवन्तः गर्वम् अनुभविष्यन्ति। गर्वस्य विषयोऽयं यत् कियन्तो महान्तो जनाः अस्माकं मध्ये विराजन्ते तथा च, स्वाभाविक-रूपेण अस्य विषयस्यापि गौरवं भविष्यति यत् केन प्रकारेण अद्यत्वे अस्माकं देशे सामान्य-जनः काञ्चिदपि अभिसंस्तुतिं विना उच्छित-तरं शिखरम् अधिरोहति। प्रतिवर्षं पद्म-पुरस्काराणां प्रदान-परम्परा सततं प्रवर्तते। विगत-वर्ष-त्रये एतद्-विषयिणी सम्पूर्णापि प्रक्रिया परिवर्तितास्ति। इतः परं कश्चन अपि नागरिकः कञ्चन अपि जनं nominate- इति नाम्ना अभिसंस्तोतुम् अर्हति। सम्पूर्णापि प्रक्रिया online- इति सद्यस्का जाता अतः एषा पारदर्शिता-समन्विता सञ्जातास्ति। एवं हि एतेषां पुरस्काराणां चयन-प्रक्रियायाः पूर्णः रूपान्तरः जातः। भवतामपि अवधानं स्यात् जातं यत् अतितरां सामान्य-जनाः अपि पद्म-पुरस्कारान् लभन्ते। तादृशेभ्योऽपि जनेभ्यः पद्म-पुरस्काराः प्रदीयन्ते ये सामान्यतया महानगरेषु, वार्तापत्रेषु, दृश्यवाहिनीषु, समारोहेषु च नावलोक्यन्ते। अधुना पुरस्कार-प्रदानार्थं जनस्य अभिज्ञानं नैव, तस्य कार्यस्य महत्वं विवर्धते। श्रीमान् अरविन्दगुप्ता- इत्यस्मै पद्म-पुरस्कार-प्राप्तेः अनन्तरमेव स्यात् प्रथमवारं भवता तस्य नाम श्रुतं भवेत्। वृत्तमिमं ज्ञात्वा भवन्तः प्रसन्नतां अनुभविष्यन्ति यत् IIT-कानपुरस्य प्राक्तनः छात्रः श्री-अरविन्दः बालानां कृते क्रीडनकानि विनिर्मातुं स्वीयं सम्पूर्णमपि जीवनं यापितवान्। असौ विगत-दशक-चतुष्कात् अवकर-संग्रहात् क्रीडनकानि विनिर्मीति येन बालेषु विज्ञानं प्रति जिज्ञासा प्रवर्धेत। तस्य प्रयत्नः अस्ति यत् बालाः निरर्थक-वस्तुभ्यः वैज्ञानिक-प्रयोगान् प्रति प्रेरिताः भवेयुः, एतदर्थम् असौ अशेष-देशस्य त्रि-सहस्राधिकेषु विद्यालयेषु गत्वा अष्टादश-भाषासु निर्मितानि चलचित्राणि अपि प्रदर्श्य बालान् प्रेरयति। कीदृशम् अद्भुतं जीवनम्! कीदृशम् अद्भुतं समर्पणम्! एतादृशी एव कथा कर्नाटकस्य सितावा-जोद्दती-(SITAVAA JODATTI)- इत्यस्याः अस्ति। एषा 'महिला-शक्तीकरणस्य देवी'- इति सगौरवम् उच्यते।

विगत-दशक-त्रयात् बेलागवी-(BELAGAVI)-क्षेत्रे एषा असंख्य-महिलानां जीवन-परिवर्तने महद्-योगदानमकरोत्। एषा सप्त-वर्षीयायुषि एव स्वयं देवदासी-रूपेण आत्मानं समार्पयत्। परञ्च पुनः देवदासीनां कल्याणार्थं स्वीयं कृत्स्नमपि जीवनम् अर्पितवती। एतावदेव नैव, सा दलित-महिलानां कल्याणार्थमपि अभूतपूर्व-कार्यमकरोत्। भवद्भिः मध्य-प्रदेशस्य भज्जू-श्यामस्य नाम श्रुतं स्यात्, श्रीमान् भज्जू-श्यामस्य जन्म अतितरां निर्धन-कुटुम्बे,आदिवासि-परिवारे अजायत। असौ जीवन-यापनाय सामान्य-वृत्तिं करोति स्म, परञ्च अस्मै पारम्परिकादिवासि-चित्रकलायां महती रुचिः आसीत्। साम्प्रतं अस्याः एव रेखाङ्कनस्य गहन-रुचेः कारणात् न केवलं भारते, अपि तु अशेष-जगति तस्य सम्माननं वर्तते।Netherlands, Germany, England, Italy-सदृशेषु अनेकेषु देशेषु तस्य चित्राणां प्रदर्शनी आयोजिता। विदेशेषु भारतस्य यशोवर्धकस्य भज्जू-श्यामस्य प्रतिभा अभिज्ञाता तथा च, तस्मै पद्मश्री-सम्माननम् उपायनीकृतम्।

केरलस्य आदिवासि-महिलालक्ष्मीकुट्टी- इत्यस्याः कथां श्रुत्वा भवन्तः सुखदमाश्चर्यम् अनुभविष्यन्ति। लक्ष्मीकुट्टी, कल्लारे शिक्षिका अस्ति, तथा च, साम्प्रतमपि गहनारण्येषु आदिवासि-क्षेत्रे ताल-पत्रैः विनिर्मिते कुटीरे निवसति। सा स्वीय-स्मृत्याधारेण एव पञ्च-शतं वनस्पतीनाम् औषधीः व्यरचयत्। सर्प-दंशस्य उपचारार्थं उपयुज्यमानायाः औषधेः निर्माणे तस्याः प्रावीण्यं सुसिद्धम्। लक्ष्मी-वर्या वनस्पतीय-औषधानां निज-ज्ञान-कारणात् अनारतं समाजं सेवते। अज्ञात-नाम्न्याः अस्याः अभिज्ञानं कृत्वा समाजे अनया अनुष्ठिताय योगदानाय सा पद्मश्रीति अलंकरणेन सम्मानितास्ति। अद्य एकस्य अपरस्य नाम्नः समुल्लेखात् नाहं आत्मानं वारयितुं शक्नोमि। पश्चिम-बंगालस्य पञ्च-सप्तति-वर्षीया सुभासिनी-मिस्त्री- इत्यस्याः नाम। सा पुरस्कारार्थं वृतास्ति। सुभासिनी-मिस्त्री तादृशी महिला अस्ति, या चिकित्सालयस्य निर्माणार्थम् अपरेषां गृहेषु भाण्डानि स्वच्छीकृतवती, शाकादि-क्रयं च व्यदधात्। यदा सा त्रयोविंशति-वर्षीया आसीत् तदा उपचारस्य अभाव-कारणात् अस्याः पत्युः मृत्युरभवत्, एषा एव घटना तां निर्धनानां कृते चिकित्सालय-निर्माणार्थं प्रैरयत्। सम्प्रति अस्याः कठोर-श्रमेण विनिर्मिते चिकित्सालये परस्सहस्राणां निर्धनानां निःशुल्कम् उपचारो विधीयते। दृढमहं विश्वसिमि यत् अस्माकं बहुरत्ना-वसुन्धरायाम् तादृश्शि अनेकानि नर-रत्नानि सन्ति, असंख्यानि नारी-रत्नानि च सन्ति, तं ताञ्च नैकोऽपि जानाति, न वा तेषां सम्यग् अभिज्ञानं भवति। एतादृशानां जनानाम् अभिज्ञानं न भवति चेत्, समाजस्यापि हानिः भवति। पद्म-पुरस्कारो नाम माध्यममस्ति, परञ्च अहं देशवासिभ्योऽपि निवेदयामि यत् अस्मान् परितः समाजस्य कृते समर्पित-जीवनाः, समाजार्थं निष्ठावन्तः, कामपि काञ्चिदपि विशेषतां सन्धारयन्तः आजीवनं कार्यानुष्ठातारः लक्ष-लक्षाधिकाः जनाः सन्ति। नूनं कदाचिदपि ते समाज-धारायां समावेशनीयाः। न ते मान-सम्मानार्थं कार्याणि आचरन्ति, परञ्च तेषाम् एभिः कार्यैः वयं प्रेरिताः भवामः। कदाचित् विद्यालयेषु, कदाचित् महाविद्यालयेषु च एतादृशाः महनीय-जनाः समामन्त्रणीयाः तेषाञ्च अनुभवाः श्रवणीयाः। पुरस्कारेभ्योऽपि अग्रे, समाजेऽपि केचन प्रयासाः भवेयुः।

मम प्रियाः देशवासिनः, प्रतिवर्षं वयं जान्युआरि-मासे नवमे दिनाङ्के प्रवासि-भारतीय-दिवसम् आमन्यामहे। अयमेव दिवसः अस्ति यदा पूज्यः महात्म-गाँधी दक्षिणाफ्रीकातः भारतं प्रत्यागतः। अस्मिन्नेव दिने वयं भारते विश्वस्मिन् विश्वे च निवसतां भारतीयानां मध्ये, अभिन्न-बन्धनस्य उत्सवमायोजयामः। ऐषमः प्रवासि-भारतीय-दिवसावसरे वयं कार्यक्रममेकं आयोजितवन्तः यत्र विश्वस्मिन् विश्वे निवसन्तोभारतीय-मूलस्य सर्वेऽपि सांसदाः महापौराः चामन्त्रिताः आसन्। भवन्तः इदं श्रुत्वा प्रसन्नताम् अनुभविष्यन्ति यत् तस्मिन् कार्यक्रमे Malaysia, New Zealand, Switzerland, Portugal, Mauritius, Fiji, Tanzania,Kenya, Canada, Britain, Surinam, दक्षिण-अफ्रीका- America-तः, अपरेभ्योऽपि देशेभ्यश्च, यत्र यत्र अस्मदीयाः महापौराः मूल-भारतीयाः सांसदाः च सन्ति, ते सर्वेऽपि सहभागित्वमावहन्। प्रसीदामितरां यत् विभिन्नेषु देशेषु निवसन्तः भारतीय-मूलाः जनाः तान् देशान् तु सेवन्ते एव, युगपदेव, ते भारतेन साकमपि स्वीयान् दृढतरान् सम्बन्धान् संधारयन्ति। ये यूरोपस्य भिन्न-भिन्नेषु देशेषु अस्माकं मूल-भारतीयाः निवसन्ति तेषु केचन CYBER SECURITY-इति क्षेत्रे कार्याणि कुर्वन्ति, केचन आयुर्वेद-क्षेत्रे समर्पिताः सन्ति, अपरे स्वीय-संगीत-माध्यमेन समाजस्य मनांसि रञ्जयन्ति, इतरे च केचन स्वीय-ललित-कविता-रचनाभिः सहृदयान् आनन्द-सन्दोहेन आप्लावयन्ति। केचन climate change- इति जलवायु-परिवर्तन-विषये अनुसन्धानं विदधति, अन्ये च भारतीय-ग्रन्थान् आश्रित्य कार्य-निरताः सन्ति। कश्चन भारवाहियानं चालयित्वा गुरुद्वारा-निर्माणम् अकरोत्, अपरेण च केनचित् मस्जिद्-निर्माणं कृतम्। अर्थात् यत्र कुत्रापि अस्मदीयाः जनाः सन्ति, ते तत्रत्यां धरां येन केनापि प्रकारेण सुसज्जितां कृतवन्तः। अहं धन्यवादान् वितरामि यूरोपीय-संघस्य अस्य उल्लेखनीय-कार्यस्य कृते,भारतीय-मूलस्य जनानाम् अभिज्ञानार्थम्, अपि च, अमुना माध्यमेन भारतस्य नागरिकेभ्यः अपि सूचना-प्रदानार्थम्। तथा च, एतन्-माध्यमेन अशेष-जगतः जनान् सूचयितुम् अपि।

जान्युआरि-मासे त्रिन्शत्तमे-दिने पूज्य-बापू-वर्यस्य पुण्य-तिथिः वर्तते,यः अस्मान् सर्वान् अभिनवं मार्गं प्रादर्शयत्। दिवसमेनं 'हुतात्म-दिन'त्वेन वयम् आयोजयामः। एतस्मिन् दिने वयं देशस्य रक्षायै हुतात्मभ्यः महद्भ्यः प्रातः एकादश-वादने श्रद्धाञ्जलिम् अर्पयामः। शान्तेः अहिंसायाश्च मार्गः एव बापू-महात्मनः अनन्य-मार्गः आसीत्। भवतु नाम भारतमिदं वा जगत्, स्यात् इदं कुटुम्बं वा एकाकी जनो वा सकलः समाजः -पूज्य-बापू-वर्यः येषां सिद्धान्तानाम् आदर्शानाञ्च कृते जीवति स्म, पूज्य-बापूः यत् किमपि अस्मान् समदिशत्,तत्सर्वम्, अद्यापि अतितरम् उपयोगि वर्तते। ते केवलं सिद्धान्ताः एव नैवासन्। वर्तमान-कालेऽपि वयं पदे पदे पश्यामः यत् बापू-वर्यस्य सन्देशः कियान् समीचीनः अस्ति। यदि वयं संकल्पयेम यत् बापू-वर्यस्य मार्गमनुसरेम - यावन्तमपि प्रचलितुं शक्नुमः, प्रचलेम - तदा एतस्मात् समुचिततरः कः अन्यः श्रद्धाञ्जलिः भविता?

मम प्रियाः देशवासिनः, अष्टादशोत्तर-द्विसहस्र-तम-वर्षार्थं मङ्गल-कामनाःवितीर्य अहम् अत्रैव विररामि। भवद्भ्यः सर्वेभ्यः मङ्गल-कामनाः भूरिशो धन्यवादाः,नमस्कारः।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

## पाठकानां कृते सूचनाः-

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C ) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# उत्सवमामायोजनं नवीन संततेः प्रतिभायाः विकासाय भवितव्यम्-दिलीपपाण्डेयः

नवदेहली। नवीन संतति उत्सवानां संवाहिका अस्ति उत्सवानामायोजनं नवीन संततेः प्रतिभायाः विकासाय भवितव्यम्। भारतीय संस्कृति व्यहारेषु वसन्तपञ्चम्याः बहु महत्वमस्ति। अस्मिन् अवसरे विद्यादात्री माँ शारदाया अराधना कृत्वा विद्या सम्पन्नतायां भारतस्यातिरिक्त अन्य कोऽपि देशः नसीत्।

अकादम्याः सचिव डॉ. जीतरामभट्टः उक्तवान यत् अकादमी छात्राणां विकासाय प्रतियोगितायाः आयोजनं करोति। सरस्वतीपूजनं सात्विकता एवं पवित्रतायाः व्योहारोऽस्ति। येषु




एवं बुद्धेः कामना करोति। वसन्त ऋतोः पञ्चमि तिथिं अयं पावनपर्व आयोजनस्य कारणेन पञ्चमी अपि कथ्यते। अयं त्योहारः भारतस्य सर्वेषु वर्गेषु मन्यते परञ्च भारतस्य अन्यस्मिन् माँ सरस्वत्या बुद्धि एवं विवेक प्रदानाय प्रार्थना करोति। अस्मिन्नवसरे अकादमी माध्येन सरस्वतीवन्दना प्रतियोगितयाः आयोजनम् अभवत्। अस्यां प्रतियोगितायां प्रतिभागी छात्र, छात्रा



क्षेत्रे भिन्न-भिन्न प्रकारेण् जनाः कुर्वन्ति।

दिल्ली संस्कृतअकादमी माध्यमेन झण्डेवालनेवसन्तपञ्चम्याः समुपलक्ष्ये आयोजित सरस्वतीपूजनावसरे ''सरस्वती वन्दना प्रतियोगितायाः'' मुख्यातिथि दिल्लीसाहित्यकलापरिषदस्य सदस्य श्री दिलीपपाण्डेय व्यक्तवान। श्रीपाण्डेय उक्तवान यत् संस्कृतभाषाबुद्धि, ज्ञानं, ललितकला, साधनं, विज्ञानम एवं प्रौद्योगिक्या: अपार सम्भावना अस्ति। यो संस्कृतभाषायाः साहित्ये निहितोऽस्ति। संस्कृतभाषा एवं संगीतस्य माध्यमेन समाजं नवीन दिशा प्रदातुं शक्यते।

कार्यक्रमस्य अध्यक्षता समये दिल्लीसंस्कृतअकादम्या उपाध्यक्षा कान्ताभाटिया उक्तवती यत् ''संस्कृत जीवनस्य आधारोऽस्ति'' सर्वविदितोऽस्ति यत् भारतं विश्वगुरु मन्यते। वस्तुतः वैदिककाल एवं वेदांगकालस्य सहित्यस्याधारकाले यदि पश्यामि येत् तर्हि ज्ञान-विज्ञानम् एवं संस्कृति-संस्काराणां माध्यमेन माँ सरस्वत्यां आधारित भिन्न-भिन्न वन्दनायाः गायनं अभवत्। इयं प्रतियोगिता द्वे स्तरे आयोजितो अभवत्। विद्यालयी य स्तर एवं महाविद्यालयीयस्तरे अस्यां प्रतियोगितायां दिल्लीप्रदेशस्य अनेकेषां विद्यालयानां एवं महाविद्यलयानां प्रतिभागी भागं गृहीतवन्तः।

प्रतियोगितायां प्रथमस्थानं, जानकीदेवीमहाविद्यालयं द्वितीयं स्थानं भारतीमहाविद्यालयं, तृतीयं स्थनं लेडीश्रीराममहाविद्यालयं, चतुर्थ स्यानं श्रीलालबहादुरशास्त्रीसंस्कृतविद्यापीठं प्राप्तमभवत्। विद्यालय स्तरे महर्षिवेदव्यासगुरूकुसविद्यापीठं प्रथमं स्थानं, द्वितीयं स्थानं ए.एस.इन्टरनेशनस स्कुल, तृतीयं स्थानं एन.के. बगडोदिया, चतुर्थ स्थानं दिल्ली-कन्नडउच्चमाध्यमिक विद्यालयं प्राप्तमभवत्।

कार्यक्रमे डॉ. विभूतिनाथझा, डॉ. हेमाउनियाल, डॉ. बलदेवानन्दसागर, डॉ. पंकजाघई अपि उपस्थिताः आसन्।

## संस्कृतम् अति सरलम्- डॉ श्रेयांश द्विवेदी

वार्ताहरः जसविन्द्रः, सोहना, गुरुग्रामः , हरियाणा। अद्य माघ शुक्ल तृतीयायां संवत् 2074 शनिवासरे हरियाणा संस्कृत अकादमी पञ्चकूला राजकीय उच्च विद्यालय, गढ़ी बाजिदपुर खण्ड सोहना,गुरुग्राम जनपदे





'नगरे नगरे भगवद्गीता, जने जने संस्कारः' इति कार्यक्रमम् आयोजितवती।

अवसरे स्मिन् उपाध्यक्षेण गीतायाःपाठनाभ्यासविधिः कण्ठस्थीकरणविधिश्च प्रस्तुता । परिणामतः अचिरमेव छात्राः श्रीमद्भगवद्गीतायाः श्लोकान् कण्ठस्थीकृत्य श्रावितवन्तः। विद्यालयस्य प्राचार्या सहर्षं प्रोक्तवती यद् मम चिन्तनं तु एवं आसीत् यद् संस्कृतं बहु कठिनम् अस्ति। अस्मिन्नवसरे उपाध्यक्षेण सर्वेषां समक्षं प्रस्तुति पूर्वकं क्रियात्मकरूपेण प्रदर्शितं यत् संस्कृतम् अति सरलम् मधुरम् वर्तते ।

अस्मिन्नवसरे शताधिकं छात्राः सोत्साहं भागं गृहीतवन्तः। विद्यालयस्य प्रभारी श्रीमती सुनीता रानी (प्रवक्ता राजनीति विज्ञान ) श्रीमती प्रतिमा यादव (गणित अध्यापिका ) श्रीमती पारुल गोस्वामी (विज्ञान अध्यापिका ) श्री योगेन्द्र सिंह (हिंदी अध्यापकः )श्री जसविंद्र शास्त्री (संस्कृत अध्यापकः ) प्रभृतयः उपस्थिताः आसन्।

## छात्रजीवनं सफलीकर्तुं समर्था गीता- डॉ श्रेयांश द्विवेदी

वार्ताहरः सुशीलः जीन्द हरियाणा। हरियाणा संस्कृत अकादमी,पञ्चकूला, माघशुक्लद्वितीया संवत् 2074 शुक्रवासरे गोपाल विद्या मन्दिरे 'नगरे नगरे भगवद्गीता जने जने संस्कारः' इति कार्यक्रम में आयोजिवती। अवसरेस्मिन् संस्थायाः अध्यक्षः श्रीमान् अरुण जैन जी



धर्मजागरण मञ्चस्य पदाधिकारी श्रीमान् योगेश सैनी जी , अखिलभारतीयविद्यर्थी परिषदः विभाग प्रमुखः श्रीमान् सुशीलः शास्त्री, संस्कृतभारत्याः कार्यकर्ता संस्कृतविद्वान् आचार्य देवी दयालः , सत्येन्द्रः त्रिपाठी प्राचार्यः आचार्याः चतुःशतं छात्राश्च सोत्साहं भागों गृहीतवन्तः। अवसरेस्मिन् डॉ श्रेयांश द्विवेदी उपाध्यक्षः हरियाणा संस्कृत अकादमी, पञ्चकूलातः समागत्य छात्राणां जीवने गीतायाः महत्वं सरलया सुगमतया च प्रतिपादितवान्। तेन गीतापाठाय बालकाः बालिकाश्च प्रेरिताः। तेनोक्तं गीतां विना छात्रजीवनं सफलं न भवति। आत्मकल्याणाय गीता सर्वोत्तमः आदर्शः।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।